श्रीमद्भागवतपुराणम्

Śrīmad Bhāgavata Purāṇa

First Canto

Text Only

Version 0.1

March 31, 2001

Contents

Chapter 1

ऋषिप्रश्नः

01010011 जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
01010012 तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः
01010013 तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
01010014 धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि
01010021 धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
01010022 वेद्यं वास्तवम् अत्र वस्तु शिवदं तापत्रयोन्मूलनम्
01010023 श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
01010024 सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्
01010031 निगमकल्पतरोर्गलितं फलं
01010032 शुकमुखादमृतद्रवसंयुतम्
01010033 पिबत भागवतं रसम् आलयं
01010034 मुहुरहो रसिका भुवि भावुकाः
01010041 नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः
01010043 सत्रं स्वर्गाय लोकाय सहस्रसमम् आसत
01010051 त एकदा तु मुनयः प्रातर्हुतहुताग्नयः
01010053 सत्कृतं सूतम् आसीनं पप्रच्छुरिदम् आदरात्
0101006 ऋषय ऊचुः
01010061 त्वया खलु पुराणानि सेतिहासानि चानघ
01010063 आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत
01010071 यानि वेदविदां श्रेष्ठो भगवान् बादरायणः
01010073 अन्ये च मुनयः सूत परावरविदो विदुः
01010081 वेत्थ त्वं सौम्य तत् सर्वं तत्त्वतस्तदनुग्रहात्
01010083 ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यम् अप्युत

01010091 तत्र तत्राञ्जसायुष्मन् भवता यद्विनिश्चितम्
01010093 पुंसाम् एकान्ततः श्रेयस्तन् नः शंसितुम् अर्हसि
01010101 प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः
01010103 मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः
01010111 भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः
01010113 अतः साधोऽत्र यत् सारं समुद्धृत्य मनीषया
01010115 ब्रूहि भद्राय भूतानां येनात्मा सुप्रसीदति
01010121 सूत जानासि भद्रं ते भगवान् सात्वतां पतिः
01010123 देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया
01010131 तन् नः शुश्रूषमाणानाम् अर्हस्यङ्गानुवर्णितुम्
01010133 यस्यावतारो भूतानां क्षेमाय च भवाय च
01010141 आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्
01010143 ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम्
01010151 यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः
01010153 सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया
01010161 को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः
01010163 शुद्धिकामो न शृणुयाद्यशः कलिमलापहम्
01010171 तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः
01010173 ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः
01010181 अथाख्याहि हरेर्धीमन्न् अवतारकथाः शुभाः
01010183 ईला विदधतः स्वैरम् ईश्वरस्यात्ममायया
01010191 वयं तु न वितृप्याम उत्तमश्लोकविक्रमे
01010193 यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे
01010201 कृतवान् किल कर्माणि सह रामेण केशवः
01010203 अतिमर्त्यानि भगवान् गूढः कपटमानुषः
01010211 कलिम् आगतम् आज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्
01010213 आसीना दीर्घसत्रेण कथायां सक्षणा हरेः
01010221 त्वं नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम्
01010223 कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम्
01010231 ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि
01010233 स्वां काष्ठाम् अधुनोपेते धर्मः कं शरणं गतः

Chapter 2

भगवदनुभाववर्णनम्

0102001 व्यास उवाच
01020011 इति सम्प्रश्नसंहृष्टो विप्राणां रौमहर्शणिः
01020013 प्रतिपूज्य वचस्तेशां प्रवक्तुम् उपचक्रमे
0102002 सूत उवाच
01020021 यं प्रव्रजन्तम् अनुपेतम् अपेतकृत्यं द्वैपायनो विरहकातर आजुहाव
01020023 पुत्रेति तन्मयतया तरवोऽभिनेदुस् तं सर्वभूतहृदयं मुनिम् आनतोऽस्मि
01020031 यः स्वानुभावम् अखिलश्रुतिसारम् एकम् अध्यात्मदीपम् अतितितीर्षतां तमोऽन्धम्
01020033 संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुम् उपयामि गुरुं मुनीनाम्
01020041 नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
01020043 देवीं सरस्वतीं व्यासं ततो जयम् उदीरयेत्
01020051 मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम्
01020053 यत् कृतः कृष्णसम्प्रश्नो येनात्मा सुप्रसीदति
01020062 स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे
01020063 अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति
01020071 वासुदेवे भगवति भक्तियोगः प्रयोजितः
01020073 जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम्
01020081 धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः
01020083 नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्
01020091 धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
01020093 नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः
01020101 कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
01020103 जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः

01020111 वदन्ति तत् तत्त्वविदस्तत्त्वं यज् ज्ञानम् अद्वयम्
01020113 ब्रह्मेति परमात्मेति भगवान् इति शब्द्यते
01020121 तच् छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया
01020123 पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया
010201o1 अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः
01020133 स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम्
01020141 तस्मादेकेन मनसा भगवान् सात्वतां पतिः
01020143 श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा
01020151 यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम्
01020153 छिन्दन्ति कोविदास्तस्य को न कुर्यात् कथारतिम्
01020161 शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः
01020163 स्यान् महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्
01020171 शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः
01020173 हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्
01020181 नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया
01020183 भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी
01020191 तदा रजस्तमोभावाः कामलोभादयश्च ये
01020193 चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति
01020201 एवं प्रसन्नमनसो भगवद्भक्तियोगतः
01020203 भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते
01020211 भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः
01020213 क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे
01020221 अतो वै कवयो नित्यं भक्तिं परमया मुदा
01020223 वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम्
01020231 सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर् युक्तः परमपुरुष एक इहास्य धत्ते
01020233 स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः
01020241 पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ।
01020243 तमसस्तु रजस्तस्मात् सत्त्वं यद्ब्रह्मदर्शनम् ॥
01020251 भेजिरे मुनयोऽथाग्रे भगवन्तम् अधोक्षजम्
01020253 सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तान् इह
01020261 मुमुक्षवो घोररूपान् हित्वा भूतपतीन् अथ
01020263 नारायणकलाः शान्ता भजन्ति ह्यनसूयवः
01020271 रजस्तमःप्रकृतयः समशीला भजन्ति वै
01020273 पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः
01020281 वासुदेवपरा वेदा वासुदेवपरा मखाः
01020283 वासुदेवपरा योग वासुदेवपराः क्रियाः

01020291 वासुदेवपरं ज्ञानं वासुदेवपरं तपः
01020293 वासुदेवपरो धर्मो वासुदेवपरा गतिः
01020301 स एवेदं ससर्जाग्रे भगवान् आत्ममायया
01020303 सदसद्रूपया चासौ गुणमयागुणो विभुः
01020311 तया विलसितेष्वेषु गुणेषु गुणवान् इव
01020313 अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः
01020321 यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु
01020323 नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्
01020331 असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः
01020333 स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान्
01020341 भावयत्येष सत्त्वेन लोकान् वै लोकभावनः
01020343 लीलावतारानुरतो देवतिर्यङ्नरादिषु

Chapter 3

जन्मगुह्यम्

0103001 सूत उवाच
01030011 जगृहे पौरुषं रूपं भगवान् महदादिभिः
01030013 सम्भूतं षोडशकलम् आदौ लोकसिसृक्षया
01030021 यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः
01030023 नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः
01030031 यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः
01030033 तद्वै भगवतो रूपं विशुद्धं सत्त्वम् ऊर्जितम्
01030041 पश्यन्त्यदो रूपम् अदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्
01030043 सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत्
01030051 एतन् नानावताराणां निधानं बीजम् अव्ययम्
01030053 यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः
01030061 स एव प्रथमं देवः कौमारं सर्गम् आश्रितः
01030063 चचार दुश्चरं ब्रह्मा ब्रह्मचर्यम् अखण्डितम्
01030071 द्वितीयं तु भवायास्य रसातलगतां महीम्
01030073 उद्धरिष्यन्न् उपादत्त यज्ञेशः सौकरं वपुः
01030081 तृतीयम् ऋषिसर्गं वै देवर्षित्वम् उपेत्य सः
01030083 तन्त्रं सात्वतम् आचष्ट नैष्कर्म्यं कर्मणां यतः
01030091 तुर्ये धर्मकलासर्गे नरनारायणावृषी
01030093 भूत्वात्मोपशमोपेतम् अकरोद्दुश्चरं तपः
01030101 पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्
01030103 प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम्
01030111 षष्ठम् अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया

01030113 आन्वीक्षिकीम् अलर्काय प्रह्लादादिभ्य ऊचिवान्
01030121 ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत
01030123 स यामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरम्
01030131 अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः
01030133 दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्
01030141 ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः
01030143 दुग्धेमाम् ओषधीर्विप्रास्तेनायं स उशत्तमः
01030151 रूपं स जगृहे मात्स्यं चाक्षुषोदधिसम्प्लवे
01030153 नाव्यारोप्य महीमय्याम् अपाद्वैवस्वतं मनुम्
01030161 सुरासुराणाम् उदधिं मथ्नतां मन्दराचलम्
01030163 दध्रे कमठरूपेण पृष्ठ एकादशे विभुः
01030171 धान्वन्तरं द्वादशमं त्रयोदशमम् एव च
01030173 अपाययत् सुरान् अन्यान् मोहिन्या मोहयन् स्त्रिया
01030181 चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रम् ऊर्जितम्
01030183 ददार करजैरूरावेरकां कटकृद्यथा
01030191 पञ्चदशं वामनकं कृत्वागादध्वरं बलेः
01030193 पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपम्
01030201 अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्
01030203 त्रिःसप्तकृत्वः कुपितो निःक्षत्राम् अकरोन् महीम्
01030211 ततः सप्तदशे जातः सत्यवत्यां पराशरात्
01030213 चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः
01030221 नरदेवत्वम् आपन्नः सुरकार्यचिकीर्षया
01030223 समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्
01030231 एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी
01030233 रामकृष्णाविति भुवो भगवान् अहरद्भरम्
01030241 ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्
01030243 बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति
01030251 अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु
01030253 जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः
01030261 अवतारा ह्यसङ्ख्येया हरेः सत्त्वनिधेर्द्विजाः
01030263 यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः
01030271 ऋषयो मनवो देवा मनुपुत्रा महौजसः
01030273 कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः
01030281 एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्
01030283 इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे
01030291 जन्म गुह्यं भगवतो य एतत् प्रयतो नरः

01030293 सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते
01030301 एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः
01030303 मायागुणैर्विरचितं महदादिभिरात्मनि
01030311 यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले
01030313 एवं द्रष्टरि दृश्यत्वम् आरोपितम् अबुद्धिभिः
01030321 अतः परं यदव्यक्तम् अव्यूढगुणबृंहितम्
01030323 अदृष्टाश्रुतवस्तुत्वात् स जीवो यत् पुनर्भवः
01030331 यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा
01030333 अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम्
01030341 यद्येषोपरता देवी माया वैशारदी मतिः
01030343 सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते
01030351 एवं च जन्मानि कर्माणि ह्यकर्तुरजनस्य च
01030353 वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः
01030361 स वा इदं विश्वम् अमोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन्
01030363 भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः
01030371 न चास्य कश्चिन् निपुणेन धातुर् अवैति जन्तुः कुमनीष ऊतीः
01030373 नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्याम् इवाज्ञः
01030381 स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः
01030383 योऽमायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धम्
01030391 अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे
01030393 कुर्वन्ति सर्वात्मकम् आत्मभावं न यत्र भूयः परिवर्त उग्रः
01030401 इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्
01030403 उत्तमश्लोकचरितं चकार भगवान् ऋषिः
01030411 निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्
01030413 तदिदं ग्राहयाम् आससुतम् आत्मवतां वरम्
01030421 सर्ववेदेतिहासानां सारं सारं समुद्धृतम्
01030423 स तु संश्रावयाम् आसमहाराजं परीक्षितम्
01030431 प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः
01030433 कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह
01030441 कलौ नष्टदृशाम् एष पुराणार्कोऽधुनोदितः
01030443 तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः
01030451 अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्
01030453 सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति

Chapter 4

नारदागमनम्

0104001 व्यास उवाच
01040011 इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम्
01040013 वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत्
0104002 शौनक उवाच
01040021 सूत सूत महाभाग वद नो वदतां वर
01040023 कथां भागवतीं पुण्यां यदाह भगवाʼ छुकः
01040031 कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना
01040033 कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः
01040041 तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः
01040043 एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते
01040051 दृष्ट्वानुयान्तम् ऋषिम् आत्मजम् अप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम्
01040053 तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुम्भिदा न तु सुतस्य विविक्त-दृष्टेः
01040061 कथम् आलक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान्
01040063 उन्मत्तमूकजडवद्विचरन् गजसाह्वये
01040071 कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह
01040073 संवादः समभूत् तात यत्रैषा सात्वती श्रुतिः
01040081 स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम्
01040083 अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम्
01040091 अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम्
01040093 तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः

01040101 स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः
01040103 प्रायोपविष्टो गङ्गायाम् अनादृत्याधिराट्श्रियम्
01040111 नमन्ति यत्पादनिकेतम् आत्मनः शिवाय हानीय धनानि शत्रवः
01040113 कथं स वीरः श्रियम् अङ्ग दुस्त्यजां युवैषतोत्स्रष्टुम् अहो सहासुभिः
01040121 शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः
01040123 जीवन्ति नात्मार्थम् असौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम्
01040131 तत् सर्वं नः समाचक्ष्व पृष्टो यदिह किञ्चन
01040133 मन्ये त्वां विषये वाचां स्नातम् अन्यत्र छान्दसात्
0104014 सूत उवाच
01040141 द्वापरे समनुप्राप्ते तृतीये युगपर्यये
01040143 जातः पराशराद्योगी वासव्यां कलया हरेः
01040151 स कदाचित् सरस्वत्या उपस्पृश्य जलं शुचिः
01040153 विविक्त एक आसीन उदिते रविमण्डले
01040161 परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा
01040163 युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे
01040171 भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम्
01040173 अश्रद्दधानान् निःसत्त्वान् दुर्मेधान् ह्रसितायुषः
01040181 दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा
01040183 सर्ववर्णाश्रमाणां यद्दध्यौ हितम् अमोघदृक्
01040191 चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम्
01040193 व्यदधाद्यज्ञसन्तत्यै वेदम् एकं चतुर्विधम्
01040201 ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः
01040203 इतिहासपुराणं च पञ्चमो वेद उच्यते
01040211 तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः
01040213 वैशम्पायन एवैको निष्णातो यजुषाम् उत
01040221 अथर्वाङ्गिरसाम् आसीत् सुमन्तुर्दारुणो मुनिः
01040223 इतिहासपुराणानां पिता मे रोमहर्षणः
01040231 त एत ऋषयो वेदं स्वं स्वं व्यस्यन्न् अनेकधा
01040233 शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्
01040241 त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा
01040243 एवं चकार भगवान् व्यासः कृपणवत्सलः
01040251 स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा
01040253 कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह
01040255 इति भारतम् आख्यानं कृपया मुनिना कृतम्
01040261 एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः
01040263 सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः

01040271 नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ
01040273 वितर्कयन् विविक्तस्थ इदं चोवाच धर्मवित्
01040281 धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः
01040283 मानिता निर्व्यलीकेन गृहीतं चानुशासनम्
01040291 भारतव्यपदेशेन ह्याम्नायार्थश्च प्रदर्शितः
01040293 दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत
01040301 तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः
01040303 असम्पन्न इवाभाति ब्रह्मवर्चस्य सत्तमः
01040311 किं वा भागवता धर्मा न प्रायेण निरूपिताः
01040313 प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः
01040321 तस्यैवं खिलम् आत्मानं मन्यमानस्य खिद्यतः
01040323 कृष्णस्य नारदोऽभ्यागादाश्रमं प्राग् उदाहृतम्
01040331 तम् अभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः
01040333 पूजयाम् आस विधिवन् नारदं सुरपूजितम्

Chapter 5

व्यासनारदसंवादे १

0105001 सूत उवाच
01050011 अथ तं सुखम् आसीन उपासीनं बृहच्छ्रवाः
01050013 देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्न् इव
0105002 नारद उवाच
01050021 पाराशर्य महाभाग भवतः कच्चिदात्मना
01050023 परितुष्यति शारीर आत्मा मानस एव वा
01050031 जिज्ञासितं सुसम्पन्नम् अपि ते महदद्भुतम्
01050033 कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम्
01050041 जिज्ञासितम् अधीतं च ब्रह्म यत् तत् सनातनम्
01050043 तथापि शोचस्यात्मानम् अकृतार्थ इव प्रभो
0105005 व्यास उवाच
01050051 अस्त्येव मे सर्वम् इदं त्वयोक्तं तथापि नात्मा परितुष्यते मे
01050053 तन्मूलम् अव्यक्तम् अगाधबोधं पृच्छामहे त्वात्मभवात्मभूतम्
01050061 स वै भवान् वेद समस्तगुह्यम् उपासितो यत् पुरुषः पुराणः
01050063 परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः
01050071 त्वं पर्यटन्न् अर्क इव त्रिलोकीम् अन्तश्चरो वायुरिवात्मसाक्षी
01050073 परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनम् अलं विचक्ष्व
0105008 श्रीनारद उवाच
01050081 भवतानुदितप्रायं यशो भगवतोऽमलम्
01050083 येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम्
01050091 यथा धर्मादयश्चार्थो मुनिवर्यानुकीर्तिताः
01050093 न तथा वासुदेवस्य महिमा ह्यनुवर्णितः
01050101 न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्

01050103 तद्वायसं तीर्थम् उशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः
01050111 तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकम् अबद्धवत्यपि
01050113 नामान्यनन्तस्य यशोऽङ्कितानि यत् शृण्वन्ति गायन्ति गृणन्ति साधवः
01050121 नैष्कर्म्यम् अप्यच्युतभाववर्जितं न शोभते ज्ञानम् अलं निरञ्जनम्
01050123 कुतः पुनः शश्वदभद्रम् ईश्वरे न चार्पितं कर्म यदप्यकारणम्
01050131 अथो महाभाग भवान् अमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः
01050133 उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम्
01050141 ततोऽन्यथा किञ्चन यद्विवक्षतः पृथग् दृशस्तत्कृतरूपनामभिः
01050143 न कर्हिचित् क्वापि च दुःस्थिता मतिर् लभेत वाताहतनौरिवास्पदम्
01050151 जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः
01050153 यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः
01050161 विचक्षणोऽस्यार्हति वेदितुं विभोर् अनन्तपारस्य निवृत्तितः सुखम्
01050163 प्रवर्तमानस्य गुणैरनात्मनस् ततो भवान् दर्शय चेष्टितं विभोः
01050171 त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर् भजन्न् अपक्वोऽथ पतेत् ततो यदि
01050173 यत्र क्व वाभद्रम् अभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः
01050181 तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमताम् उपर्यधः
01050183 तल् लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा
01050191 न वै जनो जातु कथञ्चनाव्रजेन् मुकुन्दसेव्यन्यवदङ्ग संसृतिम्
01050193 स्मरन् मुकुन्दाङ्घ्र्युपगूहनं पुनर् विहातुम् इच्छेन् न रसग्रहो जनः
01050201 इदं हि विश्वं भगवान् इवेतरो यतो जगत्स्थाननिरोधसम्भवाः
01050203 तद्धि स्वयं वेद भवांस्तथापि ते प्रादेशमात्रं भवतः प्रदर्शितम्
01050211 त्वम् आत्मनात्मानम् अवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम्
01050213 अजं प्रजातं जगतः शिवाय तन् महानुभावाभ्युदयोऽधिगण्यताम्
01050221 इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः
01050223 अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम्
01050231 अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम्
01050233 निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम्
01050241 ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि
01050243 चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि
01050251 उच्छिष्टलेपान् अनुमोदितो द्विजैः सकृत् स्म भुञ्जे तदपास्तकिल्बिषः
01050253 एवं प्रवृत्तस्य विशुद्धचेतसस् तद्धर्म एवात्मरुचिः प्रजायते
01050261 तत्रान्वहं कृष्णकथाः प्रगायताम् अनुग्रहेणाशृणवं मनोहराः
01050263 ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिः
01050271 तस्मिंस्तदा लब्धरुचेर्महामते प्रियश्रवस्यस्खलिता मतिर्मम
01050273 ययाहम् एतत् सदसत् स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे

01050281 इत्थं शरत्प्रावृषिकावृतू हरेर् विशृण्वतो मेऽनुसवं यशोऽमलम्
01050283 सङ्कीर्त्यमानं मुनिभिर्महात्मभिर् भक्तिः प्रवृत्तात्मरजस्तमोपहा
01050291 तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः
01050293 श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च
01050301 ज्ञानं गुह्यतमं यत् तत् साक्षाद्भगवतोदितम्
01050303 अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः
01050311 येनैवाहं भगवतो वासुदेवस्य वेधसः
01050313 मायानुभावम् अविदं येन गच्छन्ति तत्पदम्
01050321 एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्
01050323 यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्
01050331 आमयो यश्च भूतानां जायते येन सुव्रत
01050333 तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम्
01050341 एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः
01050343 त एवात्मविनाशाय कल्पन्ते कल्पिताः परे
01050351 यदत्र क्रियते कर्म भगवत्परितोषणम्
01050353 ज्ञानं यत् तदधीनं हि भक्तियोगसमन्वितम्
01050361 कुर्वाणा यत्र कर्माणी भगवच्छिक्षयासकृत्
01050363 गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च
01050371 ओं नमो भगवते तुभ्यं वासुदेवाय धीमहि
01050373 प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च
01050381 इति मूर्त्यभिधानेन मन्त्रमूर्तिम् अमूर्तिकम्
01050383 यजते यज्ञपुरुषं स सम्यग् दर्शनः पुमान्
01050391 इमं स्वनिगमं ब्रह्मन्न् अवेत्य मदनुष्ठितम्
01050393 अदान् मे ज्ञानम् ऐश्वर्यं स्वस्मिन् भावं च केशवः
01050401 त्वम् अप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्
01050403 प्राख्याहि दुःखैर्मुहुरर्दितात्मनां सङ्क्लेशनिर्वाणम् उशन्ति नान्यथा

Chapter 6

व्यासनारदसंवादे २

0106001 सूत उवाच
01060011 एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च
01060013 भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः
0106002 व्यास उवाच
01060021 भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव
01060023 वर्तमानो वयस्याद्ये ततः किम् अकरोद्भवान्
01060031 स्वायम्भुव कया वृत्त्या वर्तितं ते परं वयः
01060033 कथं चेदम् उदस्राक्षीः काले प्राप्ते कलेवरम्
01060041 प्राक्कल्पविषयाम् एतां स्मृतिं ते मुनिसत्तम
01060043 न ह्येष व्यवधात् काल एष सर्वनिराकृतिः
0106005 नारद उवाच
01060051 भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम
01060053 वर्तमानो वयस्याद्ये तत एतदकारषम्
01060061 एकात्मजा मे जननी योषिन् मूढा च किङ्करी
01060063 मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम्
01060071 सास्वतन्त्रा न कल्पासीद्योगक्षेमं ममेच्छती
01060073 ईशस्य हि वशे लोको योषा दारुमयी यथा
01060081 अहं च तद्ब्रह्मकुले ऊषिवांस्तदुपेक्षया
01060083 दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः
01060091 एकदा निर्गतां गेहाद्दुहन्तीं निशि गां पथि
01060093 सर्पोऽदशत् पदा स्पृष्टः कृपणां कालचोदितः
01060101 तदा तदहम् ईशस्य भक्तानां शम् अभीप्सतः
01060103 अनुग्रहं मन्यमानः प्रातिष्ठं दिशम् उत्तराम्

01060111 स्फीता’ जनपदांस्तत्र पुरग्रामव्रजाकरान्
01060113 खेटखर्वटवाटीश्च वनान्युपवनानि च
01060121 चित्रधातुविचित्राद्रीन् इभभग्नभुजद्रुमान्
01060123 जलाशया’ छ्छिवजलान् नलिनीः सुरसेविताः
01060131 चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः
01060133 नलवेणुशरस्तन्ब कुशकीचकगह्वरम्
01060141 एक एवातियातोऽहम् अद्राक्षं विपिनं महत्
01060143 घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरम्
01060151 परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः
01060153 स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः
01060161 तस्मिन् निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः
01060163 आत्मनात्मानम् आत्मस्थं यथाश्रुतम् अचिन्तयम्
01060171 ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा
01060173 औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन् मे शनैर्हरिः
01060181 प्रेमातिभरनिर्भिन्न पुलकाङ्गोऽतिनिर्वृतः
01060183 आनन्दसम्प्लवे लीनो नापश्यम् उभयं मुने
01060191 रूपं भगवतो यत् तन् मनःकान्तं शुचापहम्
01060193 अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव
01060201 दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि
01060203 वीक्षमाणोऽपि नापश्यम् अवितृप्त इवातुरः
01060211 एवं यतन्तं विजने माम् आहागोचरो गिराम्
01060213 गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्न् इव
01060221 हन्तास्मि’ जन्मनि भवान् मा मां द्रष्टुम् इहार्हति
01060223 अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम्
01060231 सकृद्यद्दर्शितं रूपम् एतत् कामाय तेऽनघ
01060233 मत्कामः शनकैः साधु सर्वान् मुञ्चति हृच्छयान्
01060241 सत्सेवयादीर्घयापि जाता मयि दृढा मतिः
01060243 हित्वावद्यम् इमं लोकं गन्ता मज्जनताम् असि
01060251 मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्
01060253 प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात्
01060261 एतावदुक्त्वोपरराम तन् महद् भूतं नभोलिङ्गम् अलिङ्गम् ईश्वरम्
01060263 अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेऽनुकम्पितः
01060271 नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्
01060273 गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः
01060281 एवं कृष्णमतेर्ब्रह्मन् नासक्तस्यामलात्मनः

01060283 कालः प्रादुरभूत् काले तडित् सौदामनी यथा
01060291 प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्
01060293 आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः
01060301 कल्पान्त इदम् आदाय शयानेऽम्भस्युदन्वतः
01060303 शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः
01060311 सहस्रयुगपर्यन्ते उत्थायेदं सिसृक्षतः
01060313 मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे
01060321 अन्तर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कन्दितव्रतः
01060323 अनुग्रहान् महाविष्णोरविघातगतिः क्वचित्
01060331 देवदत्ताम् इमां वीणां स्वरब्रह्मविभूषिताम्
01060333 मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम्
01060341 प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः
01060343 आहूत इव मे शीघ्रं दर्शनं याति चेतसि
01060351 एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः
01060353 भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम्
01060361 यमादिभिर्योगपथैः कामलोभहतो मुहुः
01060363 मुकुन्दसेवया यद्वत् तथात्माद्धा न शाम्यति
01060371 सर्वं तदिदम् आख्यातं यत् पृष्टोऽहं त्वयानघ
01060373 जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम्
0106038 सूत उवाच
01060381 एवं सम्भाष्य भगवान् नारदो वासवीसुतम्
01060383 आमन्त्र्य वीणां रणयन् ययौ यादृच्छिको मुनिः
01060391 अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः
01060393 गायन् माद्यन्न् इदं तन्त्र्या रमयत्यातुरं जगत्

Chapter 7

द्रौणिदण्डो

0107001 शौनक उवाच
01070011 निर्गते नारदे सूत भगवान् बादरायणः
01070011 श्रुतवांस्तदभिप्रेतं ततः किम् अकरोद्विभुः
0107002 सूत उवाच
01070021 ब्रह्मनद्यां सरस्वत्याम् आश्रमः पश्चिमे तटे
01070023 शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः
01070031 तस्मिन् स्व आश्रमे व्यासो बदरीषण्डमण्डिते
01070033 आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयम्
01070041 भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले
01070043 अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयम्
01070051 यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्
01070053 परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते
01070061 अनर्थोपशमं साक्षाद्भक्तियोगम् अधोक्षजे
01070063 लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम्
01070071 यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे
01070073 भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा
01070081 स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम्
01070083 शुकम् अध्यापयाम् आस निवृत्तिनिरतं मुनिः
0107009 शौनक उवाच
01070091 स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः
01070093 कस्य वा बृहतीम् एताम् आत्मारामः समभ्यसत्
0107010 सूत उवाच
01070101 आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे

01070103 कुर्वन्त्यहैतुकीं भक्तिम् इत्थम्भूतगुणो हरिः
01070111 हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः
01070113 अध्यगान् महदाख्यानं नित्यं विष्णुजनप्रियः
01070121 परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम्
01070123 संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम्
01070131 यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु
01070133 वृकोदराविद्धगदाभिमर्श भग्नोरुदण्डे धृतराष्ट्रपुत्रे
01070141 भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि
01070143 उपाहरद्विप्रियम् एव तस्य जुगुप्सितं कर्म विगर्हयन्ति
01070151 माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना
01070153 तदारुदद्वाष्पकलाकुलाक्षी तां सान्त्वयन्न् आह किरीटमाली
01070161 तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः
01070163 गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत् स्नास्यसि दग्धपुत्रा
01070171 इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाच्युतमित्रसूतः
01070173 अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन
01070181 तम् आपतन्तं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन
01070183 पराद्रवत् प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथा कः
01070191 यदाशरणम् आत्मानम् ऐक्षत श्रान्तवाजिनम्
01070193 अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः
01070201 अथोपस्पृश्य सलिलं सन्दधे तत् समाहितः
01070203 अजानन्न् अपि संहारं प्राणकृच्छ्र उपस्थिते
01070211 ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतो दिशम्
01070213 प्राणापदम् अभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह
0107022 अर्जुन उवाच
01070221 कृष्ण कृष्ण महाबाहो भक्तानाम् अभयङ्कर
01070223 त्वम् एको दह्यमानानाम् अपवर्गोऽसि संसृतेः
01070231 त्वम् आद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः
01070233 मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि
01070241 स एव जीवलोकस्य मायामोहितचेतसः
01070243 विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम्
01070251 तथायं चावतारस्ते भुवो भारजिहीर्षया
01070253 स्वानां चानन्यभावानाम् अनुध्यानाय चासकृत्
01070261 किम् इदं स्वित् कुतो वेति देवदेव न वेद्म्यहम्
01070263 सर्वतो मुखम् आयाति तेजः परमदारुणम्
0107027 श्रीभगवान् उवाच

01070271 वेत्थेदं द्रोणपुत्रस्य ब्राह्मम् अस्त्रं प्रदर्शितम्
01070273 नैवासौ वेद संहारं प्राणबाध उपस्थिते
01070281 न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्शनम्
01070283 जह्यस्त्रतेज उन्नद्धम् अस्त्रज्ञो ह्यस्त्रतेजसा
0107029 सूत उवाच
01070291 श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा
01070293 स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्रं सन्दधे
01070301 संहत्यान्योन्यम् उभयोस्तेजसी शरसंवृते
01070303 आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत्
01070311 दृष्ट्वास्त्रतेजस्तु तयोस्त्रील् लोकान् प्रदहन् महत्
01070313 दह्यमानाः प्रजाः सर्वाः सांवर्तकम् अमंसत
01070321 प्रजोपद्रवम् आलक्ष्य लोकव्यतिकरं च तम्
01070323 मतं च वासुदेवस्य सञ्जहारार्जुनो द्वयम्
01070331 तत आसाद्य तरसा दारुणं गौतमीसुतम्
01070333 बबन्धामर्षताम्राक्षः पशुं रशनया यथा
01070341 शिबिराय निनीषन्तं रज्ज्वा बद्ध्वा रिपुं बलात्
01070343 प्राहार्जुनं प्रकुपितो भगवान् अम्बुजेक्षणः
01070351 मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुम् इमं जहि
01070353 योऽसावनागसः सुप्तान् अवधीन् निशि बालकान्
01070361 मत्तं प्रमत्तम् उन्मत्तं सुप्तं बालं स्त्रियं जडम्
01070363 प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित्
01070371 स्वप्राणान् यः परप्राणैः प्रपुष्णात्यघृणः खलः
01070373 तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान्
01070381 प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम
01070383 आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा
01070391 तदसौ वध्यतां पाप आततायात्मबन्धुहा
01070393 भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः
0107040 सूत उवाच
01070401 एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः
01070403 नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान्
01070411 अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः
01070413 न्यवेदयत् तं प्रियायै शोचन्त्या आत्मजान् हतान्
01070421 तथाहृतं पशुवत् पाशबद्धम् अवाङ्मुखं कर्मजुगुप्सितेन
01070423 निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च
01070431 उवाच चासहन्त्यस्य बन्धनानयनं सती
01070433 मुच्यतां मुच्यताम् एष ब्राह्मणो नितरां गुरुः

01070441 सरहस्यो धनुर्वेदः सविसर्गोपसंयमः
01070443 अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात्
01070451 स एष भगवान् द्रोणः प्रजारूपेण वर्तते
01070453 तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी
01070461 तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलम्
01070463 वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यम् अभीक्ष्णशः
01070471 मा रोदीदस्य जननी गौतमी पतिदेवता
01070473 यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः
01070481 यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः
01070483 तत् कुलं प्रदहत्याशु सानुबन्धं शुचार्पितम्
0107049 सूत उवाच
01070491 धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत्
01070493 राजा धर्मसुतो राज्ञ्याःप्रत्यनन्दद्वचो द्विजाः
01070501 नकुलः सहदेवश्च युयुधानो धनञ्जयः
01070503 भगवान् देवकीपुत्रो ये चान्ये याश्च योषितः
01070511 तत्राहामर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः
01070513 न भर्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा
01070521 निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः
01070523 आलोक्य वदनं सख्युरिदम् आह हसन्न् इव
0107053 श्रीभगवान् उवाच
01070531 ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः
01070533 मयैवोभयम् आम्नातं परिपाह्यनुशासनम्
01070541 कुरु प्रतिश्रुतं सत्यं यत् तत् सान्त्वयता प्रियाम्
01070543 प्रियं च भीमसेनस्य पाञ्चाल्या मह्यम् एव च
0107055 सूत उवाच
01070551 अर्जुनः सहसाज्ञाय हरेर्हार्दम् अथासिना
01070553 मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम्
01070561 विमुच्य रशनाबद्धं बालहत्याहतप्रभम्
01070563 तेजसा मणिना हीनं शिबिरान् निरयापयत्
01070571 वपनं द्रविणादानं स्थानान् निर्यापणं तथा
01070573 एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः
01070581 पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया
01070583 स्वानां मृतानां यत् कृत्यं चक्रुर्निर्हरणादिकम्

Chapter 8

युधिष्ठिरानुतापः

0108001 सूत उवाच
01080011 अथ ते सम्परेतानां स्वानाम् उदकम् इच्छताम्
01080013 दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः
01080021 ते निनीयोदकं सर्वे विलप्य च भृशं पुनः
01080023 आप्लुता हरिपादाब्जरजःपूतसरिज्जले
01080031 तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम्
01080033 गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः
01080041 सान्त्वयाम् आस मुनिभिर्हतबन्धू’ शुचार्पितान्
01080043 भूतेषु कालस्य गतिं दर्शयन् न प्रतिक्रियाम्
01080051 साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतम्
01080053 घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः
01080061 याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः
01080063 तद्यशः पावनं दिक्षु शतमन्योरिवातनोत्
01080071 आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः
01080073 द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः
01080081 गन्तुं कृतमतिर्ब्रह्मन् द्वारकां रथम् आस्थितः
01080083 उपलेभेऽभिधावन्तीम् उत्तरां भयविह्वलाम्
0108009 उत्तरोवाच
01080091 पाहि पाहि महायोगिन् देवदेव जगत्पते
01080093 नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्
01080101 अभिद्रवति माम् ईश शरस्तप्तायसो विभो
01080103 कामं दहतु मां नाथ मा मे गर्भो निपात्यताम्
0108011 सूत उवाच

01080111 उपधार्य वचस्तस्या भगवान् भक्तवत्सलः
01080113 अपाण्डवम् इदं कर्तुं द्रौणेरस्त्रम् अबुध्यत
01080121 तर्ह्येवाथ मुनिश्रेष्ठ पाण्डवाः पञ्च सायकान्
01080123 आत्मनोऽभिमुखान् दीप्तान् आलक्ष्यास्त्राण्युपाददुः
01080131 व्यसनं वीक्ष्य तत् तेषाम् अनन्यविषयात्मनाम्
01080133 सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः
01080141 अन्तःस्थः सर्वभूतानाम् आत्मा योगेश्वरो हरिः
01080143 स्वमाययावृणोद्गर्भं वैराट्याः कुरुतन्तवे
01080151 यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम्
01080153 वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह
01080161 मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमये ऽच्युते
01080163 य इदं मायया देव्या सृजत्यवति हन्त्यजः
01080171 ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया
01080173 प्रयाणाभिमुखं कृष्णम् इदम् आह पृथा सती
0108018 कुन्त्युवाच
01080181 नमस्ये पुरुषं त्वाद्यम् ईश्वरं प्रकृतेः परम्
01080183 अलक्ष्यं सर्वभूतानाम् अन्तर्बहिरवस्थितम्
01080191 मायाजवनिकाच्छन्नम् अज्ञाधोक्षजम् अव्ययम्
01080193 न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा
01080201 तथा परमहंसानां मुनीनाम् अमलात्मनाम्
01080203 भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः
01080211 कृष्णाय वासुदेवाय देवकीनन्दनाय च
01080213 नन्दगोपकुमाराय गोविन्दाय नमो नमः
01080221 नमः पङ्कजनाभाय नमः पङ्कजमालिने
01080223 नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये
01080231 यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता
01080233 विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात्
01080241 विषान् महाग्नेः पुरुषाददर्शनाद् असत्सभाया वनवासकृच्छ्रतः
01080243 मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः
01080251 विपदः सन्तु ताः शश्वत् तत्र तत्र जगद्गुरो
01080253 भवतो दर्शनं यत् स्यादपुनर्भवदर्शनम्
01080261 जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्
01080263 नैवार्हत्यभिधातुं वै त्वाम् अकिञ्चनगोचरम्
01080271 नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये
01080273 आत्मारामाय शान्ताय कैवल्यपतये नमः
01080281 मन्ये त्वां कालम् ईशानम् अनादिनिधनं विभुम्

01080283 समं चरन्तं सर्वत्र भूतानां यन् मिथः कलिः
01080291 न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम्
01080293 न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद् द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम्
01080301 जन्म कर्म च विश्वात्मन्न् अजस्याकर्तुरात्मनः
01080303 तिर्यङ्-षिषु यादःसु तदत्यन्तविडम्बनम्
01080311 गोप्याददे त्वयि कृतागसि दाम तावद् या ते दशाश्रुकलिलाञ्जनसम्भ्रमा-क्षम्
01080313 वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति
01080321 केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये
01080323 यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम्
01080331 अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात्
01080333 अजस्त्वम् अस्य क्षेमाय वधाय च सुरद्विषाम्
01080341 भारावतारणायान्ये भुवो नाव इवोदधौ
01080343 सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः
01080351 भवेऽस्मिन् क्लिश्यमानानाम् अविद्याकामकर्मभिः
01080353 श्रवणस्मरणार्हाणि करिष्यन्न् इति केचन
01080361 शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः
01080363 त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम्
01080371 अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित् सुहृदोऽनुजीविनः
01080373 येषां न चान्यद्भवतः पदाम्बुजात् परायणं राजसु योजितांहसाम्
01080381 के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः
01080383 भवतोऽदर्शनं यर्हि हृषीकाणाम् इवेशितुः
01080391 नेयं शोभिष्यते तत्र यथेदानीं गदाधर
01080393 त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः
01080401 इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः
01080403 वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः
01080411 अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे
01080413 स्नेहपाशम् इमं छिन्धि दृढं पाण्डुषु वृष्णिषु
01080421 त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत्
01080423 रतिम् उद्वहतादद्धा गङ्गेवौघम् उदन्वति
01080431 श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग् राजन्यवंशदहनानपवर्गवीर्य
01080433 गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन् नमस्ते
0108044 सूत उवाच
01080441 पृथयेत्थं कलपदैः परिणूताखिलोदयः
01080443 मन्दं जहास वैकुण्ठो मोहयन्न् इव मायया
01080451 तां बाढम् इत्युपामन्त्र्य प्रविश्य गजसाह्वयम्

01080453 स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः
01080461 व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा
01080463 प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः
01080471 आह राजा धर्मसुतश्चिन्तयन् सुहृदां वधम्
01080473 प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः
01080481 अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः
01080483 पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः
01080491 बालद्विजसुहृन्मित्र पितृभ्रातृगुरुद्रुहः
01080493 न मे स्यान् निरयान् मोक्षो ह्यपि वर्षायुतायुतैः
01080501 नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम्
01080503 इति मे न तु बोधाय कल्पते शासनं वचः
01080511 स्त्रीणां मद्धतबन्धूनां द्रोहो योऽसाविहोत्थितः
01080513 कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम्
01080521 यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम्
01080523 भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुम् अर्हति

Chapter 9

युधिष्ठिरराज्योपलम्भः

0109001 सूत उवाच
01090011 इति भीतः प्रजाद्रोहात् सर्वधर्मविवित्सया
01090013 ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत्
01090021 तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः
01090023 अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा
01090031 भगवान् अपि विप्रर्षे रथेन सधनञ्जयः
01090033 स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः
01090041 दृष्ट्वा निपतितं भूमौ दिवश्च्युतम् इवामरम्
01090043 प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा
01090051 तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम
01090053 राजर्षयश्च तत्रासन् द्रष्टुं भरतपुङ्गवम्
01090061 पर्वतो नारदो धौम्यो भगवान् बादरायणः
01090063 बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः
01090071 वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः
01090073 कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः
01090081 अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोऽमलाः
01090083 शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः
01090091 तान् समेतान् महाभागान् उपलभ्य वसूत्तमः
01090093 पूजयाम् आस धर्मज्ञो देशकालविभागवित्
01090101 कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम्
01090103 हृदिस्थं पूजयाम् आस माययोपात्तविग्रहम्
01090111 पाण्डुपुत्रान् उपासीनान् प्रश्रयप्रेमसङ्गतान्
01090113 अभ्याचष्टानुरागाश्रैरन्धीभूतेन चक्षुषा

01090121 अहो कष्टम् अहोऽन्याय्यं यद्यूयं धर्मनन्दनाः
01090123 जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः
01090131 संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजा वधूः
01090133 युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः
01090141 सर्वं कालकृतं मन्ये भवतां च यदप्रियम्
01090143 सपालो यद्वशे लोको वायोरिव घनावलिः
01090151 यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः
01090153 कृष्णोऽस्त्री गाण्डिवं चापं सुहृत् कृष्णस्ततो विपत्
01090161 न ह्यस्य कर्हिचिद्राजन् पुमान् वेद विधित्सितम्
01090163 यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि
01090171 तस्मादिदं दैवतन्त्रं व्यवस्य भरतर्षभ
01090173 तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो
01090181 एष वै भगवान् साक्षादाद्यो नारायणः पुमान्
01090183 मोहयन् मायया लोकं गूढश्चरति वृष्णिषु
01090191 अस्यानुभावं भगवान् वेद गुह्यतमं शिवः
01090193 देवर्षिर्नारदः साक्षाद्भगवान् कपिलो नृप
01090201 यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम्
01090203 अकरोः सचिवं दूतं सौहृदादथ सारथिम्
01090211 सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः
01090213 तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित्
01090221 तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम्
01090223 यन् मेऽसूंस्त्यजतः साक्षात् कृष्णो दर्शनम् आगतः
01090231 भक्त्यावेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन्
01090233 त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः
01090241 स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम्
01090243 प्रसन्नहासारुणलोचनोल्लसन् मुखाम्बुजो ध्यानपथश्चतुर्भुजः
0109025 सूत उवाच
01090251 युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे
01090253 अपृच्छद्विविधान् धर्मान् ऋषीणां चानुशृण्वताम्
01090261 पुरुषस्वभावविहितान् यथावर्णं यथाश्रमम्
01090263 वैराग्यरागोपाधिभ्याम् आम्नातोभयलक्षणान्
01090271 दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः
01090273 स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः
01090281 धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने
01090283 नानाख्यानेतिहासेषु वर्णयाम् आस तत्त्ववित्

01090291 धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः
01090293 यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः
01090301 तदोपसंहृत्य गिरः सहस्रणीर् विमुक्तसङ्गं मन आदिपूरुषे
01090303 कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेऽमीलितदृग् व्यधारयत्
01090311 विशुद्धया धारणया हताशुभस् तदीक्षयैवाशु गतायुधश्रमः
01090313 निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस् तुष्टाव जन्यं विसृज' जनार्दनम्
0109032 श्रीभीष्म उवाच
01090321 इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि
01090323 स्वसुखम् उपगते क्वचिद्विहर्तुं प्रकृतिम् उपेयुषि यद्भवप्रवाहः
01090331 त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने
01090333 वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या
01090341 युधि तुरगरजोविधूम्रविष्वक् कचलुलितश्रमवार्यलङ्कृतास्ये
01090343 मम निशितशरैर्विभिद्यमान त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा
01090351 सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य
01090353 स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु
01090361 व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या
01090363 कुमतिम् अहरदात्मविद्यया यश् चरणरतिः परमस्य तस्य मेऽस्तु
01090371 स्वनिगमम् अपहाय मत्प्रतिज्ञाम् ऋतम् अधिकर्तुम् अवप्लुतो रथस्थः
01090373 धृतरथचरणोऽभ्ययाच् चलद्गुर् हरिरिव हन्तुम् इभं गतोत्तरीयः
01090381 शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे
01090383 प्रसभम् अभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः
01090391 विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये
01090393 भगवति रतिरस्तु मे मुमूर्षोर् यम् इह निरीक्ष्य हता गताः स्वरूपम्
01090401 ललितगतिविलासवल्गुहास प्रणयनिरीक्षणकल्पितोरुमानाः
01090403 कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिम् अगन् किल यस्य गोपवध्वः
01090411 मुनिगणनृपवर्यसङ्कुलेऽन्तः सदसि युधिष्ठिरराजसूय एषाम्
01090413 अर्हणम् उपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा
01090421 तम् इमम् अहम् अजं शरीरभाजां हृदि हृदि धिष्ठितम् आत्मकल्पितानाम्
01090423 प्रतिदृशम् इव नैकधार्कम् एकं समधिगतोऽस्मि विधूतभेदमोहः
0109043 सूत उवाच
01090431 कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः
01090433 आत्मन्यात्मानम् आवेश्य सोऽन्तःश्वास उपारमत्
01090441 सम्पद्यमानम् आज्ञाय भीष्मं ब्रह्मणि निष्कले
01090443 सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये
01090451 तत्र दुन्दुभयो नेदुर्देवमानववादिताः
01090453 शशंसुः साधवो राज्ञां खात् पेतुः पुष्पवृष्टयः

01090461 तस्य निर्हरणादीनि सम्परेतस्य भार्गव
01090463 युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत्
01090471 तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः
01090473 ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः
01090481 ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम्
01090483 पितरं सान्त्वयाम् आस गान्धारीं च तपस्विनीम्
01090491 पित्रा चानुमतो राजा वासुदेवानुमोदितः
01090493 चकार राज्यं धर्मेण पितृपैतामहं विभुः

Chapter 10

कृष्णद्वारकागमनम्

0110001 शौनक उवाच
01100011 हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः
01100013 सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किम् अकारषीत् ततः
0110002 सूत उवाच
01100021 वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः
01100023 निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह
01100031 निशम्य भीष्मोक्तम् अथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः
01100033 शशास गाम् इन्द्र इवाजिताश्रयः परिध्युपान्ताम् अनुजानुवर्तितः
01100041 कामं ववर्ष पर्जन्यः सर्वकामदुघा मही
01100043 सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा
01100051 नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः
01100053 फलन्त्योषधयः सर्वाः कामम् अन्वृतु तस्य वै
01100061 नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः
01100063 अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित्
01100071 उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः
01100073 सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया
01100081 आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम्
01100083 आरुरोह रथं कैश्चित् परिष्वक्तोऽभिवादितः
01100091 सुभद्रा द्रौपदी कुन्ती विराटतनया तथा
01100093 गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ
01100101 वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः
01100103 न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः
01100111 सत्सङ्गान् मुक्तदुःसङ्गो हातुं नोत्सहते बुधः

01100113 कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम्
01100121 तस्मिन् न्यस्तधियः पार्थाः सहेरन् विरहं कथम्
01100123 दर्शनस्पर्शसंलाप शयनासनभोजनैः
01100131 सर्वे तेऽनिमिषैरक्षैस्तम् अनु द्रुतचेतसः
01100133 वीक्षन्तः स्नेहसम्बद्धा विचेलुस्तत्र तत्र ह
01100141 न्यरुन्धन्न् उद्गलद्बाष्पम् औत्कण्ठ्याद्देवकीसुते
01100143 निर्यात्यगारान् नोऽभद्रम् इति स्याद्बान्धवस्त्रियः
01100151 मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः
01100153 धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा
01100161 प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया
01100163 ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः
01100171 सितातपत्रं जग्राह मुक्तादामविभूषितम्
01100173 रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह
01100181 उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते
01100183 विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि
01100191 अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः
01100193 नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः
01100201 अन्योन्यम् आसीत् सञ्जल्प उत्तमश्लोकचेतसाम्
01100203 कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः
01100211 स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि
01100213 अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन् निशि सुप्तशक्तिषु
01100221 स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम्
01100223 अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत्
01100231 स वा अयं यत् पदम् अत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः
01100233 पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुम् अर्हति
01100241 स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः
01100243 य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते
01100251 यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल
01100253 धत्ते भगं सत्यम् ऋतं दयां यशो भवाय रूपाणि दधद्युगे युगे
01100261 अहो अलं श्लाघ्यतमं यदोः कुलम् अहो अलं पुण्यतमं मधोर्वनम्
01100263 यदेष पुंसाम् ऋषभः श्रियः पतिः स्वजन्मना चङ्क्रमणेन चाञ्चति
01100271 अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः
01100273 पश्यन्ति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः
01100281 नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः
01100283 पिबन्ति याः सख्यधरामृतं मुहुर् व्रजस्त्रियः सम्मुमुहुर्यदाशयाः
01100291 या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः

01100293 प्रद्युम्नसाम्बाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः
01100301 एताः परं स्त्रीत्वम् अपास्तपेशलं निरस्तशौचं बत साधु कुर्वते
01100303 यासां गृहात् पुष्करलोचनः पतिर् न जात्वपैत्याहृतिभिर्हृदि स्पृशन्
01100311 एवंविधा गदन्तीनां स गिरः पुरयोषिताम्
01100313 निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः
01100321 अजातशत्रुः पृतनां गोपीथाय मधुद्विषः
01100323 परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुरङ्गिणीम्
01100331 अथ दूरागतान् शौरिः कौरवान् विरहातुरान्
01100333 सन्निवर्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः
01100341 कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान्
01100343 ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतान् अथ
01100351 मरुधन्वम् अतिक्रम्य सौवीराभीरयोः परान्
01100353 आनर्तान् भार्गवोपागाच् छ्रान्तवाहो मनाग् विभुः
01100361 तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः
01100363 सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा

Chapter 11

कृष्णद्वारकाप्रवेशः

0111001 सूत उवाच
01110011 आनर्तान् स उपव्रज्य स्वृद्धा' जनपदान् स्वकान्
01110013 दध्मौ दरवरं तेषां विषादं शमयन्न् इव
01110021 स उच्चकाशे धवलोदरो दरो 'प्युरुक्रमस्याधरशोणशोणिमा
01110023 दाध्मायमानः करकञ्जसम्पुटे यथाब्जखण्डे कलहंस उत्स्वनः
01110031 तम् उपश्रुत्य निनदं जगद्भयभयावहम्
01110033 प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः
01110041 तत्रोपनीतबलयो रवेर्दीपम् इवादृताः
01110043 आत्मारामं पूर्णकामं निजलाभेन नित्यदा
01110051 प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा
01110053 पितरं सर्वसुहृदम् अवितारम् इवार्भकाः
01110061 नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम्
01110063 परायणं क्षेमम् इहेच्छतां परं न यत्र कालः प्रभवेत् परः प्रभुः
01110071 भवाय नस्त्वं भव विश्वभावन त्वम् एव माताथ सुहृत्पतिः पिता
01110073 त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम
01110081 अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानाम् अपि दूरदर्शनम्
01110083 प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम्
01110091 यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया
01110093 तत्राब्दकोटिप्रतिमः क्षणो भवेद् रविं विनाक्ष्णोरिव नस्तवाच्युत
01110101 कथं वयं नाथ चिरोषिते त्वयि प्रसन्नदृष्ट्याखिलतापशोषणम्
01110103 जीवेम ते सुन्दरहासशोभितम् अपश्यमाना वदनं मनोहरम्
01110111 इति चोदीरिता वाचः प्रजानां भक्तवत्सलः

01110113 शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत् पुरम्
01110121 मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः
01110123 आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीम् इव
01110131 सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः
01110133 उद्यानोपवनारामैर्वृतपद्माकरश्रियम्
01110141 गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम्
01110143 चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम्
01110151 सम्मार्जितमहामार्ग रथ्यापणकचत्वराम्
01110153 सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः
01110161 द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः
01110163 अलङ्कृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः
01110171 निशम्य प्रेष्ठम् आयान्तं वसुदेवो महामनाः
01110173 अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः
01110181 प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः
01110183 प्रहर्षवेगोच्छशितशयनासनभोजनाः
01110191 वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः
01110193 शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः
01110195 प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः
01110201 वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः
01110203 लसत्कुण्डलनिर्भातकपोलवदनश्रियः
01110211 नटनर्तकगन्धर्वाः सूतमागधवन्दिनः
01110213 गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च
01110221 भगवांस्तत्र बन्धूनां पौराणाम् अनुवर्तिनाम्
01110223 यथाविध्युपसङ्गम्य सर्वेषां मानम् आदधे
01110231 प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः
01110233 आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः
01110241 स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि
01110243 आशीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाविशत् पुरम्
01110251 राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः
01110253 हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः
01110261 नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम्
01110263 न वितृप्यन्ति हि दृशः श्रियो धामाङ्गम् अच्युतम्
01110271 श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम्
01110273 बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम्
01110281 सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि
01110283 पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः

01110291 प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः
01110293 ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा
01110301 ताः पुत्रम् अङ्कम् आरोप्य स्नेहस्नुतपयोधराः
01110303 हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः
01110311 अथाविशत् स्वभवनं सर्वकामम् अनुत्तमम्
01110313 प्रासादा यत्र पत्नीनां सहस्राणि च षोडश
01110321 पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य सञ्जातमनोमहोत्सवाः
01110323 उत्तस्थुरारात् सहसासनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः
01110331 तम् आत्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरे पतिम्
01110333 निरुद्धम् अप्यास्रवदम्बु नेत्रयोर् विलज्जतीनां भृगुवर्य वैक्लवात्
01110341 यद्यप्यसौ पार्श्वगतो रहोगतस् तथापि तस्याङ्घ्रियुगं नवं नवम्
01110343 पदे पदे का विरमेत तत्पदाच् चलापि यच् छ्रीर्न जहाति कर्हिचित्
01110351 एवं नृपाणां क्षितिभारजन्मनाम् अक्षौहिणीभिः परिवृत्ततेजसाम्
01110353 विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः
01110361 स एष नरलोकेऽस्मिन्न् अवतीर्णः स्वमायया
01110363 रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा
01110371 उद्दामभावपिशुनामलवल्गुहास
01110372 व्रीडावलोकनिहतो मदनोऽपि यासाम्
01110373 सम्मुह्य चापम् अजहात् प्रमदोत्तमास्ता
01110374 यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः
01110381 तम् अयं मन्यते लोको ह्यसङ्गम् अपि सङ्गिनम्
01110383 आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः
01110391 एतदीशनम् ईशस्य प्रकृतिस्थोऽपि तद्गुणैः
01110393 न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया
01110401 तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः
01110403 अप्रमाणविदो भर्तुरीश्वरं मतयो यथा

Chapter 12

परीक्षिज्जन्म

0112001 शौनक उवाच
01120011 अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा
01120013 उत्तराया हतो गर्भ ईशेनाजीवितः पुनः
01120021 तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः
01120023 निधनं च यथैवासीत् स प्रेत्य गतवान् यथा
01120031 तदिदं श्रोतुम् इच्छामो गदितुं यदि मन्यसे
01120033 ब्रूहि नः श्रद्दधानानां यस्य ज्ञानम् अदाच् छुकः
0112004 सूत उवाच
01120041 अपीपलद्धर्मराजः पितृवद्रञ्जयन् प्रजाः
01120043 निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया
01120051 सम्पदः क्रतवो लोका महिषी भ्रातरो मही
01120053 जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम्
01120061 किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः
01120063 अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे
01120071 मातुर्गर्भगतो वीरः स तदा भृगुनन्दन
01120073 ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा
01120081 अङ्गुष्ठमात्रम् अमलं स्फुरत्पुरटमौलिनम्
01120083 अपीव्यदर्शनं श्यामं तडिद्वाससम् अच्युतम्
01120091 श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम्
01120093 क्षतजाक्षं गदापाणिम् आत्मनः सर्वतो दिशम्
01120095 परिभ्रमन्तम् उल्काभां भ्रामयन्तं गदां मुहुः
01120101 अस्त्रतेजः स्वगदया नीहारम् इव गोपतिः
01120103 विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ

01120111 विधूय तदमेयात्मा भगवान् धर्मगुब् विभुः
01120113 मिषतो दशमासस्य तत्रैवान्तर्दधे हरिः
01120121 ततः सर्वगुणोदर्के सानुकूलग्रहोदये
01120123 जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा
01120131 तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः
01120133 जातकं कारयाम् आस वाचयित्वा च मङ्गलम्
01120141 हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान्
01120143 प्रादात् स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्
01120151 तम् ऊचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितम्
01120153 एष ह्यस्मिन् प्रजातन्तौ पुरूणां पौरवर्षभ
01120161 दैवेनाप्रतिघातेन शुक्ले संस्थाम् उपेयुषि
01120163 रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना
01120171 तस्मान् नाम्ना विष्णुरात इति लोके भविष्यति
01120173 न सन्देहो महाभाग महाभागवतो महान्
0112018 श्रीराजोवाच
01120181 अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः
01120183 अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः
0112019 ब्राह्मणा ऊचुः
01120191 पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः
01120193 ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा
01120201 एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः
01120203 यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम्
01120211 धन्विनाम् अग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः
01120213 हुताश इव दुर्धर्षः समुद्र इव दुस्तरः
01120221 मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवान् इव
01120223 तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव
01120231 पितामहसमः साम्ये प्रसादे गिरिशोपमः
01120233 आश्रयः सर्वभूतानां यथा देवो रमाश्रयः
01120241 सर्वसद्गुणमाहात्म्ये एष कृष्णम् अनुव्रतः
01120243 रन्तिदेव इवोदारो ययातिरिव धार्मिकः
01120251 हृत्या बलिसमः कृष्णे प्रह्राद इव सद्ग्रहः
01120253 आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः
01120261 राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम्
01120263 निग्रहीता कलेरेष भुवो धर्मस्य कारणात्
01120271 तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात्
01120273 प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः

01120281 जिज्ञासितात्मयाथार्थ्यो मुनेर्व्याससुतादसौ
01120283 हित्वेदं नृप गङ्गायां यास्यत्यद्धाकुतोभयम्
01120291 इति राज्ञ उपादिश्य विप्रा जातककोविदाः
01120293 लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान्
01120301 स एष लोके विख्यातः परीक्षिदिति यत् प्रभुः
01120303 पूर्वं दृष्टम् अनुध्यायन् परीक्षेत नरेष्विह
01120311 स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः
01120313 आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम्
01120321 यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया
01120323 राजा लब्धधनो दध्यौ नान्यत्र करदण्डयोः
01120331 तदभिप्रेतम् आलक्ष्य भ्रातरो ऽच्युतचोदिताः
01120333 धनं प्रहीणम् आजह्रुरुदीच्यां दिशि भूरिशः
01120341 तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः
01120343 वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम्
01120351 आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम्
01120353 उवास कतिचिन् मासान् सुहृदां प्रियकाम्यया
01120361 ततो राज्ञाभ्यनुज्ञातः कृष्णया सहबन्धुभिः
01120363 ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः

Chapter 13

पारीक्षिते नारदवाक्यम्

0113001 सूत उवाच
01130011 विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम्
01130013 ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः
01130021 यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः
01130023 जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह
01130031 तं बन्धुम् आगतं दृष्ट्वा धर्मपुत्रः सहानुजः
01130033 धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा
01130041 गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी
01130043 अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताः स्त्रियः
01130051 प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम्
01130053 अभिसङ्गम्य विधिवत् परिष्वङ्गाभिवादनैः
01130061 मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः
01130063 राजा तम् अर्हयां चक्रे कृतासनपरिग्रहम्
01130071 तं भुक्तवन्तं विश्रान्तम् आसीनं सुखम् आसने
01130073 प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम्
0113008 युधिष्ठिर उवाच
01130081 अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्
01130083 विपद्गणाद्विषाग्न्यादेर्मोचिता यत् समातृकाः
01130091 कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम्
01130093 तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले
01130101 भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो
01130103 तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता

01130111 अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः
01130113 दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखम् आसते
01130121 इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत्
01130123 यथानुभूतं क्रमशो विना यदुकुलक्षयम्
01130131 नन्वप्रियं दुर्विषहं नृणां स्वयम् उपस्थितम्
01130133 नावेदयत् सकरुणो दुःखितान् द्रष्टुम् अक्षमः
01130141 कञ्चित् कालम् अथावात्सीत् सत्कृतो देववत् सुखम्
01130143 भ्रातुर्ज्येष्ठस्य श्रेयस्कृत् सर्वेषां सुखम् आवहन्
01130151 अबिभ्रदर्यमा दण्डं यथावदघकारिषु
01130153 यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः
01130161 युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलन्धरम्
01130163 भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया
01130171 एवं गृहेषु सक्तानां प्रमत्तानां तदीहया
01130173 अत्यक्रामदविज्ञातः कालः परमदुस्तरः
01130181 विदुरस्तदभिप्रेत्य धृतराष्ट्रम् अभाषत
01130183 राजन् निर्गम्यतां शीघ्रं पश्येदं भयम् आगतम्
01130191 प्रतिक्रिया न यस्येह कुतश्चित् कर्हिचित् प्रभो
01130193 स एष भगवान् कालः सर्वेषां नः समागतः
01130201 येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि
01130203 जनः सद्यो वियुज्येत किम् उतान्यैर्धनादिभिः
01130211 पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयम्
01130213 आत्मा च जरया ग्रस्तः परगेहम् उपाससे
01130221 अन्धः पुरैव वधिरो मन्दप्रज्ञाश्च साम्प्रतम्
01130223 विशीर्णदन्तो मन्दाग्निः सरागः कफम् उद्वहन्
01130231 अहो महीयसी जन्तोर्जीविताशा यथा भवान्
01130233 भीमापवर्जितं पिण्डम् आदत्ते गृहपालवत्
01130241 अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः
01130243 हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत्
01130251 तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः
01130253 परैत्यनिच्छतो जीर्णो जरया वाससी इव
01130261 गतस्वार्थम् इमं देहं विरक्तो मुक्तबन्धनः
01130263 अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः
01130271 यः स्वकात् परतो वेह जातनिर्वेद आत्मवान्
01130273 हृदि कृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः
01130281 अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान्

01130283 इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः
01130291 एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः
01130293 छित्त्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम भ्रातृसन्दर्शिताध्वा
01130301 पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी
01130303 हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनाम् इव सत् सम्प्रहारः
01130311 अजातशत्रुः कृतमैत्रो हुताग्निर् विप्रान् नत्वा तिलगोभूमिरुक्मैः
01130313 गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत् पितरौ सौबलीं च
01130321 तत्र सञ्जयम् आसीनं पप्रच्छोद्विग्नमानसः
01130323 गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः
01130331 अम्बा च हतपुत्रार्ता पितृव्यः क्व गतः सुहृत्
01130333 अपि मय्यकृतप्रज्ञे हतबन्धुः स भार्यया
01130335 आशंसमानः शमलं गङ्गायां दुःखितोऽपतत्
01130341 पितर्युपरते पाण्डौ सर्वान् नः सुहृदः शिशून्
01130343 अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः
0113035 सूत उवाच
01130351 कृपया स्नेहवैक्लव्यात् सूतो विरहकर्शितः
01130353 आत्मेश्वरम् अचक्षाणो न प्रत्याहातिपीडितः
01130361 विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानम् आत्मना
01130363 अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन्
0113037 सञ्जय उवाच
01130371 नाहं वेद व्यवसितं पित्रोर्वः कुलनन्दन
01130373 गान्धार्या वा महाबाहो मुषितोऽस्मि महात्मभिः
01130381 अथाजगाम भगवान् नारदः सहतुम्बुरुः
01130383 प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन् मुनिम्
0113039 युधिष्ठिर उवाच
01130391 नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः
01130393 अम्बा वा हतपुत्रार्ता क्व गता च तपस्विनी
01130401 कर्णधार इवापारे भगवान् पारदर्शकः
01130403 अथाबभाषे भगवान् नारदो मुनिसत्तमः
0113041 नारद उवाच
01130411 मा कञ्चन शुचो राजन् यदीश्वरवशं जगत्
01130413 लोकाः सपाला यस्येमे वहन्ति बलिम् ईशितुः
01130415 स संयुनक्ति भूतानि स एव वियुनक्ति च
01130421 यथा गावो नसि प्रोतास्तन्त्यां बद्धाश्च दामभिः
01130423 वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिम् ईशितुः
01130431 यथा क्रीडोपस्कराणां संयोगविगमाविह

01130433 इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम्
01130441 यन् मन्यसे ध्रुवं लोकम् अध्रुवं वा न चोभयम्
01130443 सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात्
01130451 तस्माज् जह्यङ्ग वैक्लव्यम् अज्ञानकृतम् आत्मनः
01130453 कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना
01130461 कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः
01130463 कथम् अन्यांस्तु गोपायेत् सर्पग्रस्तो यथा परम्
01130471 अहस्तानि सहस्तानाम् अपदानि चतुष्पदाम्
01130473 फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्
01130481 तदिदं भगवान् राजन्न् एक आत्मात्मनां स्वदृक्
01130483 अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा
01130491 सोऽयम् अद्य महाराज भगवान् भूतभावनः
01130493 कालरूपोऽवतीर्णोऽस्याम् अभावाय सुरद्विषाम्
01130501 निष्पादितं देवकृत्यम् अवशेषं प्रतीक्षते
01130503 तावद्यूयम् अवेक्षध्वं भवेद्यावदिहेश्वरः
01130511 धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया
01130513 दक्षिणेन हिमवत ऋषीणाम् आश्रमं गतः
01130521 स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात्
01130523 सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते
01130531 स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन् यथाविधि
01130533 अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः
01130541 जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः
01130543 हरिभावनया ध्वस्तरजःसत्त्वतमोमलः
01130551 विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम्
01130553 ब्रह्मण्यात्मानम् आधारे घटाम्बरम् इवाम्बरे
01130561 ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः
01130563 निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः
01130565 तस्यान्तरायो मैवाभूः सन्न्यस्ताखिलकर्मणः
01130571 स वा अद्यतनाद्राजन् परतः पञ्चमेऽहनि
01130573 कलेवरं हास्यति स्वं तच् च भस्मीभविष्यति
01130581 दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे
01130583 बहिः स्थिता पतिं साध्वी तम् अग्निम् अनु वेक्ष्यति
01130591 विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन
01130593 हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः
01130601 इत्युक्त्वाथारुहत् स्वर्गं नारदः सहतुम्बुरुः
01130603 युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच् छुचः

Chapter 14

युधिष्टिरवितर्कः

0114001 सूत उवाच
01140011 सम्प्रस्थिते द्वारकायांजिष्णौ बन्धुदिदृक्षया
01140013 ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम्
01140021 व्यतीताः कतिचिन् मासास्तदा नायात् ततोऽर्जुनः
01140023 ददर्श घोररूपाणि निमित्तानि कुरूद्वहः
01140031 कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः
01140033 पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम्
01140041 जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम्
01140043 पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम्
01140051 निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम्
01140053 लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः
0114006 युधिष्ठिर उवाच
01140061 सम्प्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षयाज्
01140063 ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम्
01140071 गताः सप्ताधुना मासा भीमसेन तवानुजः
01140073 नायाति कस्य वा हेतोर्नाहं वेदेदम् अञ्जसा
01140081 अपि देवर्षिणादिष्टः स कालोऽयम् उपस्थितः
01140083 यदात्मनोऽङ्गम् आक्रीडं भगवान् उत्सिसृक्षति
01140091 यस्मान् नः सम्पदो राज्यं दाराः प्राणाः कुलं प्रजाः
01140093 आसन् सपत्नविजयो लोकाश्च यदनुग्रहात्
01140101 पश्योत्पातान् नरव्याघ्र दिव्यान् भौमान् सदैहिकान्
01140103 दारुणान् शंसतोऽदूराद्भयं नो बुद्धिमोहनम्

01140111 ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः
01140113 वेपथुश्चापि हृदये आराद्दास्यन्ति विप्रियम्
01140121 शिवैषोद्यन्तम् आदित्यम् अभिरौत्यनलानना
01140123 माम् अङ्ग सारमेयोऽयम् अभिरेभत्यभीरुवत्
01140131 शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे
01140133 वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम
01140141 मृत्युदूतः कपोतोऽयम् उलूकः कम्पयन् मनः
01140143 प्रत्युलूकश्च कुह्वानैर्विश्वं वै शून्यम् इच्छतः
01140151 धूम्रा दिशः परिधयः कम्पते भूः सहाद्रिभिः
01140153 निर्घातश्च महांस्तात साकं च स्तनयित्नुभिः
01140161 वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः
01140163 असृग् वर्षन्ति जलदा बीभत्सम् इव सर्वतः
01140171 सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि
01140173 ससङ्कुलैर्भूतगणैर्ज्वलिते इव रोदसी
01140181 नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च
01140183 न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति
01140191 न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः
01140193 रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे
01140201 दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च
01140203 इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः
01140205 भ्रष्टश्रियो निरानन्दाः किम् अघं दर्शयन्ति नः
01140211 मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः
01140213 अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा
01140221 इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा
01140223 राज्ञः प्रत्यागमद्ब्रह्मन् यदुपुर्याः कपिध्वजः
01140231 तं पादयोर्निपतितम् अयथापूर्वम् आतुरम्
01140233 अधोवदनम् अब्बिन्दून् सृजन्तं नयनाब्जयोः
01140241 विलोक्योद्विग्नहृदयो विच्छायम् अनुजं नृपः
01140243 पृच्छति स्म सुहृन् मध्ये संस्मरन् नारदेरितम्
0114025 युधिष्ठिर उवाच
01140251 कच्चिदानर्तपुर्यां नः स्वजनाः सुखम् आसते
01140253 मधुभोजदशार्हार्ह सात्वतान्धकवृष्णयः
01140261 शूरो मातामहः कच्चित् स्वस्त्यास्ते वाथ मारिषः
01140263 मातुलः सानुजः कच्चित् कुशल्यानकदुन्दुभिः
01140271 सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः
01140273 आसते सस्नुषाः क्षेमंदेवकीप्रमुखाः स्वयम्

01140281 कच्चिद्राजाहुको जीवत्यसत्पुत्रोऽस्य चानुजः
01140283 हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः
01140291 आसते कुशलं कच्चिद्ये च शत्रुजिदादयः
01140293 कच्चिदास्ते सुखं रामो भगवान् सात्वतां प्रभुः
01140301 प्रद्युम्नः सर्ववृष्णीनां सुखम् आस्ते महारथः
01140303 गम्भीररयोऽनिरुद्धो वर्धते भगवान् उत
01140311 सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः
01140313 अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः
01140321 तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः
01140323 सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः
01140331 अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः
01140333 अपि स्मरन्ति कुशलम् अस्माकं बद्धसौहृदाः
01140341 भगवान् अपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः
01140343 कच्चित् पुरे सुधर्मायां सुखम् आस्ते सुहृद्वृतः
01140351 मङ्गलाय च लोकानां क्षेमाय च भवाय च
01140353 आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान्
01140361 यद्बाहुदण्डगुप्तायां स्वपुर्यां यदवोऽर्चिताः
01140363 क्रीडन्ति परमानन्दं महापौरुषिका इव
01140371 यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः
01140373 निर्जित्य सङ्ख्ये त्रिदशांस्तदाशिषो हरन्ति वज्रायुधवल्लभोचिताः
01140381 यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः
01140383 अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम्
01140391 कच्चित् तेऽनामयं तात भ्रष्टतेजा विभासि मे
01140393 अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः
01140401 कच्चिन् नाभिहतोऽभावैः शब्दादिभिरमङ्गलैः
01140403 न दत्तम् उक्तम् अर्थिभ्य आशया यत् प्रतिश्रुतम्
01140411 कच्चित् त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम्
01140413 शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः
01140421 कच्चित् त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियम्
01140423 पराजितो वाथ भवान् नोत्तमैर्नासमैः पथि
01140431 अपि स्वित् पर्यभुङ्क्थास्त्वं सम्भोज्यान् वृद्धबालकान्
01140433 जुगुप्सितं कर्म किञ्चित् कृतवान् न यदक्षमम्
01140441 कच्चित् प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना
01140443 शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक्

Chapter 15

युधिष्ठिरादिस्वर्गारोहणम्

0115001 सूत उवाच
01150011 एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः
01150013 नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः
01150021 शोकेन शुष्यद्वदन हृत्सरोजो हतप्रभः
01150023 विभुं तम् एवानुस्मरन् नाशक्नोत् प्रतिभाषितुम्
01150031 कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः
01150033 परोक्षेण समुन्नद्ध प्रणयौत्कण्ठ्यकातरः
01150041 सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्
01150043 नृपम् अग्रजम् इत्याह बाष्पगद्गदया गिरा
0115005 अर्जुन उवाच
01150051 वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा
01150053 येन मेऽपहृतं तेजो देवविस्मापनं महत्
01150061 यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः
01150063 उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा
01150071 यत्संश्रयाद्द्रुपदगेहम् उपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम्
01150073 तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा
01150081 यत्सन्निधावहम् उ खाण्डवम् अग्नयेऽदाम् इन्द्रं च सामरगणं तरसा वि-
जित्य
01150083 लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन् नृपतयो बलिम् अध्वरे
ते
01150091 यत्तेजसा नृपशिरो'ङ्घ्रिम् अहन् मखार्थम् आर्योऽनुजस्तव गजायुतसत्त्व-
वीर्यः
01150093 तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन् बलिम् अध्वरे ते

01150101 पत्न्यास्तवाधिमखक्लृप्तमहाभिषेक श्लाघिष्ठचारुकबरं कितवैः सभायाम्
01150103 स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियोऽकृतहतेशविमुक्तकेशाः
01150111 यो नो जुगोप वन एत्य दुरन्तकृच्छ्राद् दुर्वाससोऽरिरचितादयुताग्रभुग्
यः
01150113 शाकान्नशिष्टम् उपयुज्य यतस्त्रिलोकीं तृप्ताम् अमंस्त सलिले विनिमग्न-
सङ्घः
01150121 यत्तेजसाथ भगवान् युधि शूलपाणिर् विस्मापितः सगिरिजोऽस्त्रम् अदान्
निजं मे
01150123 अन्येऽपि चाहम् अमुनैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्धम्
01150131 तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणम् अरातिवधाय देवाः
01150133 सेन्द्राः श्रिता यदनुभावितम् आजमीढ तेनाहम् अद्य मुषितः पुरुषेण भूम्ना
01150141 यद्बान्धवः कुरुबलाब्धिम् अनन्तपारम् एको रथेन ततरेऽहम् अतीर्यस-
त्त्वम्
01150143 प्रत्याहृतं बहु धनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः
01150151 यो भीष्मकर्णगुरुशल्यचमूष्वदभ्र राजन्यवर्यरथमण्डलमण्डितासु
01150153 अग्रेचरो मम विभो रथयूथपानाम् आयुर्मनांसि च दृशा सह ओज आ-
र्च्छत्
01150161 यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्ण नप्तृत्रिगर्तशल्यसैन्धवबाह्लिकाद्यैः
01150163 अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासम् इवासुराणि
01150171 सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्मम् अभवाय भजन्ति भव्याः
01150173 मां श्रान्तवाहम् अरयो रथिनो भुविष्ठं न प्राहरन् यदनुभावनिरस्तचित्ताः
01150181 नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति
01150183 सञ्जल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठन्ति हृदयं मम माधवस्य
01150191 शय्यासनाटनविकत्थनभोजनादिष्व् ऐक्याद्वयस्य ऋतवान् इति विप्रलब्धः
01150193 सख्युः सखेव पितृवत् तनयस्य सर्वं सेहे महान् महितया कुमतेरघं मे
01150201 सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः
01150203 अध्वन्युरुक्रमपरिग्रहम् अङ्ग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोऽस्मि
01150211 तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आनमन्ति
01150213 सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन् हुतं कुहकराद्धम् इवोप्तम् ऊष्याम्
01150221 राजंस्त्वयानुपृष्टानां सुहृदां नः सुहृत्पुरे
01150223 विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः
01150231 वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम्
01150233 अजानताम् इवान्योन्यं चतुःपञ्चावशेषिताः
01150241 प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितम्
01150243 मिथो निघ्नन्ति भूतानि भावयन्ति च यन् मिथः
01150251 जलौकसां जले यद्वन् महान्तोऽदन्त्यणीयसः

01150253 दुर्बलान् बलिनो राजन् महान्तो बलिनो मिथः
01150261 एवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः
01150263 यदून् यदुभिरन्योन्यं भूभारान् सञ्जहार ह
01150271 देशकालार्थयुक्तानि हृत्तापोपशमानि च
01150273 हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे
0115028 सूत उवाच
01150281 एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम्
01150283 सौहार्देनातिगाढेन शान्तासीद्विमला मतिः
01150291 वासुदेवाङ्घ्र्यनुध्यान परिबृंहितरंहसा
01150293 भक्त्या निर्मथिताशेष कषायधिषणोऽर्जुनः
01150301 गीतं भगवता ज्ञानं यत् तत् सङ्ग्राममूर्धनि
01150303 कालकर्मतमोरुद्धं पुनरध्यगमत् प्रभुः
01150311 विशोको ब्रह्मसम्पत्त्या सञ्छिन्नद्वैतसंशयः
01150313 लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः
01150321 निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च
01150323 स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः
01150331 पृथाप्यनुश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिं च ताम्
01150333 एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः
01150341 ययाहरद्भुवो भारं तां तनुं विजहावजः
01150343 कण्टकं कण्टकेनेव द्वयं चापीशितुः समम्
01150351 यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः
01150353 भूभारः क्षपितो येनजहौ तच् च कलेवरम्
01150361 यदा मुकुन्दो भगवान् इमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः
01150363 तदाहरेवाप्रतिबुद्धचेतसाम् अभद्रहेतुः कलिरन्ववर्तत
01150371 युधिष्ठिरस्तत् परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि
01150373 विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात्
01150381 स्वराट् पौत्रं विनयिनम् आत्मनः सुसमं गुणैः
01150383 तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये
01150391 मथुरायां तथा वज्रं शूरसेनपतिं ततः
01150393 प्राजापत्यां निरूप्येष्टिम् अग्नीन् अपिबदीश्वरः
01150401 विसृज्य तत्र तत् सर्वं दुकूलवलयादिकम्
01150403 निर्ममो निरहङ्कारः सञ्छिन्नाशेषबन्धनः
01150411 वाचं जुहाव मनसि तत् प्राण इतरे च तम्
01150413 मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत्
01150421 त्रित्वे हुत्वा च पञ्चत्वं तच् चैकत्वे ऽजुहोन् मुनिः

01150423 सर्वम् आत्मन्यजुहवीद्ब्रह्मण्यात्मानम् अव्यये
01150431 चीरवासा निराहारो बद्धवाङ् मुक्तमूर्धजः
01150433 दर्शयन्न् आत्मनो रूपं जडोन्मत्तपिशाचवत्
01150441 अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा
01150443 उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः
01150445 हृदि ब्रह्म परं ध्यायन् नावर्तेत यतो गतः
01150451 सर्वे तम् अनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः
01150453 कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि
01150461 ते साधुकृतसर्वार्था ज्ञात्वात्यन्तिकम् आत्मनः
01150463 मनसा धारयाम् आसुर्वैकुण्ठचरणाम्बुजम्
01150471 तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे
01150473 तस्मिन् नारायणपदे एकान्तमतयो गतिम्
01150481 अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः
01150483 विधूतकल्मषा स्थानं विरजेनात्मनैव हि
01150491 विदुरोऽपि परित्यज्य प्रभासे देहम् आत्मनः
01150493 कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ
01150501 द्रौपदी च तदाज्ञाय पतीनाम् अनपेक्षताम्
01150503 वासुदेवे भगवति ह्येकान्तमतिराप तम्
01150511 यः श्रद्धयैतद्भगवत्प्रियाणां पाण्डोः सुतानाम् इति सम्प्रयाणम्
01150513 शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिम् उपैति सिद्धिम्

Chapter 16

धर्मपृथ्वीसंवादः

0116001 सूत उवाच
01160011 ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह
01160013 यथा हि सूत्याम् अभिजातकोविदाः समादिशन् विप्र महद्गुणस्तथा
01160021 स उत्तरस्य तनयाम् उपयेम इरावतीम्
01160023 जनमेजयादींश्चतुरस्तस्याम् उत्पादयत् सुतान्
01160031 आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान्
01160033 शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः
01160041 निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित्
01160043 नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा
0116005 शौनक उवाच
01160051 कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः
01160053 नृदेवचिह्नधृक् शूद्र कोऽसौ गां यः पदाहनत्
01160055 तत् कथ्यतां महाभाग यदि कृष्णकथाश्रयम्
01160061 अथवास्य पदाम्भोज मकरन्दलिहां सताम्
01160063 किम् अन्यैरसदालापैरायुषो यदसद्व्ययः
01160071 क्षुद्रायुषां नृणाम् अङ्ग मर्त्यानाम् ऋतम् इच्छताम्
01160073 इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि
01160081 न कश्चिन् म्रियते तावद्यावदास्त इहान्तकः
01160083 एतदर्थं हि भगवान् आहूतः परमर्षिभिः
01160085 अहो नृलोके पीयेत हरिलीलामृतं वचः
01160091 मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै
01160093 निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः
0116010 सूत उवाच

01160101 यदा परीक्षित् कुरुजाङ्गलेऽवसत् कलिं प्रविष्टं निजचक्रवर्तिते
01160103 निशम्य वार्ताम् अनतिप्रियां ततः शरासनं संयुगशौण्डिराददे
01160111 स्वलङ्कृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजम् आश्रितः पुरात्
01160113 वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः
01160121 भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून्
01160123 किम्पुरुषादीनि वर्षाणि विजित्य जगृहे बलिम्
01160131 नगरांश्च वनांश्चैव नदीश्च विमलोदकाः
01160133 पुरुषान् देवकल्पांश्च नारीश्च प्रियदर्शनाः
01160141 अदृष्टपूर्वान् सुभगान् स ददर्श धनञ्जयः
01160143 सदनानि च शुभ्राणि नारीश्चाप्सरसां निभाः
01160151 तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम्
01160153 प्रगीयमाणं च यशः कृष्णमाहात्म्यसूचकम्
01160161 आत्मानं च परित्रातम् अश्वत्थाम्नोऽस्त्रतेजसः
01160163 स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे
01160171 तेभ्यः परमसन्तुष्टः प्रीत्युज्जृम्भितलोचनः
01160173 महाधनानि वासांसि ददौ हारान् महामनाः
01160181 सारथ्यपारषदसेवनसख्यदौत्य
01160182 वीरासनानुगमनस्तवनप्रणामान्
01160183 स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णोर्
01160184 भक्तिं करोति नृपतिश्चरणारविन्दे
01160191 तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिम् अन्वहम्
01160193 नातिदूरे किलाश्चर्यं यदासीत् तन् निबोध मे
01160201 धर्मः पदैकेन चरन् विच्छायाम् उपलभ्य गाम्
01160203 पृच्छति स्माश्रुवदनां विवत्साम् इव मातरम्
0116021 धर्म उवाच
01160211 कच्चिद्भद्रेऽनामयम् आत्मनस्ते विच्छायासि म्लायतेषन् मुखेन
01160213 आलक्षये भवतीम् अन्तराधिं दूरे बन्धुं शोचसि कञ्चनाम्ब
01160221 पादैर्न्यूनं शोचसि मैकपादम् आत्मानं वा वृषलैर्भोक्ष्यमाणम्
01160223 आहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन् मघवत्यवर्षति
01160231 अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान्
01160233 वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान्
01160241 किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि
01160243 इतस्ततो वाशनपानवासः स्नानव्यवायोन्मुखजीवलोकम्
01160251 यद्वाम्ब ते भूरिभरावतार कृतावतारस्य हरेर्धरित्रि
01160253 अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि

01160261 इदं ममाचक्ष्व तवाधिमूलं वसुन्धरे येन विकर्शितासि
01160263 कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतम् अम्ब सौभगम्
0116027 धरण्युवाच
01160271 भवान् हि वेद तत् सर्वं यन् मां धर्मानुपृच्छसि
01160273 चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः
01160281 सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम्
01160283 शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्
01160291 ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः
01160293 स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवम् एव च
01160301 प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः
01160303 गाम्भीर्यं स्थैर्यम् आस्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः
01160311 एते चान्ये च भगवन् नित्या यत्र महागुणाः
01160313 प्रार्थ्या महत्त्वम् इच्छद्भिर्न वियन्ति स्म कर्हिचित्
01160321 तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम्
01160323 शोचामि रहितं लोकं पाप्मना कलिनेक्षितम्
01160331 आत्मानं चानुशोचामि भवन्तं चामरोत्तमम्
01160333 देवान् पित्-न् ऋषीन् साधून् सर्वान् वर्णांस्तथाश्रमान्
01160341 ब्रह्मादयो बहुतिथं यदपाङ्गमोक्ष
01160342 कामास्तपः समचरन् भगवत्प्रपन्नाः
01160343 सा श्रीः स्ववासम् अरविन्दवनं विहाय
01160344 यत्पादसौभगम् अलं भजतेऽनुरक्ता
01160351 तस्याहम् अब्जकुलिशाङ्कुशकेतुकेतैः
01160352 श्रीमत्पदैर्भगवतः समलङ्कृताङ्गी
01160353 त्रीन् अत्यरोच उपलभ्य ततो विभूतिं
01160354 लोकान् स मां व्यसृजदुत्स्मयतीं तदन्ते
01160361 यो वै ममातिभरम् आसुरवंशराज्ञाम्
01160362 अक्षौहिणीशतम् अपानुददात्मतन्त्रः
01160363 त्वां दुःस्थम् ऊनपदम् आत्मनि पौरुषेण
01160364 सम्पादयन् यदुषु रम्यम् अबिभ्रदङ्गम्
01160371 का वा सहेत विरहं पुरुषोत्तमस्य
01160372 प्रेमावलोकरुचिरस्मितवल्गुजल्पैः
01160373 स्थैर्यं समानम् अहरन् मधुमानिनीनां
01160374 रोमोत्सवो मम यदङ्घ्रिविटङ्किताया:
01160381 तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा
01160383 परीक्षिन् नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम्

Chapter 17

कलिनिग्रहः

0117001 सूत उवाच
01170011 तत्र गोमिथुनं राजा हन्यमानम् अनाथवत्
01170013 दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम्
01170021 वृषं मृणालधवलं मेहन्तम् इव बिभ्यतम्
01170023 वेपमानं पदैकेन सीदन्तं शूद्रताडितम्
01170031 गां च धर्मदुघां दीनां भृशं शूद्रपदाहताम्
01170033 विवत्साम् आश्रुवदनां क्षामां यवसम् इच्छतीम्
01170041 पप्रच्छ रथम् आरूढः कार्तस्वरपरिच्छदम्
01170043 मेघगम्भीरया वाचा समारोपितकार्मुकः
01170051 कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली
01170053 नरदेवोऽसि वेषेण नटवत् कर्मणाद्विजः
01170061 यस्त्वं कृष्णे गते दूरं सहगाण्डीवधन्वना
01170063 शोच्योऽस्यशोच्यान् रहसि प्रहरन् वधम् अर्हसि
01170071 त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन्
01170073 वृषरूपेण किं कश्चिद्देवो नः परिखेदयन्
01170081 न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते
01170083 भूतलेऽनुपतन्त्यस्मिन् विना ते प्राणिनां शुचः
01170091 मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भयम्
01170093 मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि
01170101 यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः
01170103 तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः
01170111 एष राज्ञां परो धर्मो ह्यार्तानाम् आर्तिनिग्रहः

01170113 अत एनं वधिष्यामि भूतद्रुहम् असत्तमम्
01170121 कोऽवृश्चत् तव पादांस्त्रीन् सौरभेय चतुष्पद
01170123 मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम्
01170131 आख्याहि वृष भद्रं वः साधूनाम् अकृतागसाम्
01170133 आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम्
01170141 जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयम्
01170143 साधूनां भद्रम् एव स्यादसाधुदमने कृते
01170151 अनागःस्विह भूतेषु य आगस्कृन् निरङ्कुशः
01170153 आहर्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम्
01170161 राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम्
01170163 शासतोऽन्यान् यथाशास्त्रम् अनापद्युत्पथान् इह
0117017 धर्म उवाच
01170171 एतद्वः पाण्डवेयानां युक्तम् आर्ताभयं वचः
01170173 येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः
01170181 न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ
01170183 पुरुषं तं विजानीमो वाक्यभेदविमोहिताः
01170191 केचिद्विकल्पवसना आहुरात्मानम् आत्मनः
01170193 दैवम् अन्येऽपरे कर्म स्वभावम् अपरे प्रभुम्
01170201 अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः
01170203 अत्रानुरूपं राजर्षे विमृश स्वमनीषया
0117021 सूत उवाच
01170211 एवं धर्मे प्रवदति स सम्राड्द्विजसत्तमाः
01170213 समाहितेन मनसा विखेदः पर्यचष्ट तम्
0117022 राजोवाच
01170221 धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्
01170223 यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत्
01170231 अथवा देवमायाया नूनं गतिरगोचरा
01170233 चेतसो वचसश्चापि भूतानाम् इति निश्चयः
01170241 तपः शौचं दया सत्यम् इति पादाः कृते कृताः
01170243 अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव
01170251 इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः
01170253 तं जिघृक्षत्यधर्मोऽयम् अनृतेनैधितः कलिः
01170261 इयं च भूमिर्भगवता न्यासितोरुभरा सती
01170263 श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका
01170271 शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता सती
01170273 अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति माम् इति

01170281 इति धर्मं महीं चैव सान्त्वयित्वा महारथः
01170283 निशातम् आददे खड्गं कलयेऽधर्महेतवे
01170291 तं जिघांसुम् अभिप्रेत्य विहाय नृपलाञ्छनम्
01170293 तत्पादमूलं शिरसा समगाद्भयविह्वलः
01170301 पतितं पादयोर्वीरः कृपया दीनवत्सलः
01170303 शरण्यो नावधीच् छ्लोक्य आह चेदं हसन्न् इव
0117031 राजोवाच
01170311 न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्वै भयम् अस्ति किञ्चित्
01170313 न वर्तितव्यं भवता कथञ्चन क्षेत्रे मदीये त्वम् अधर्मबन्धुः
01170321 त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयम् अधर्मपूगः
01170323 लोभोऽनृतं चौर्यम् अनार्यम् अंहो ज्येष्ठा च माया कलहश्च दम्भः
01170331 न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये
01170333 ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः
01170341 यस्मिन् हरिर्भगवान् इज्यमान इज्यात्ममूर्तिर्यजतां शं तनोति
01170343 कामान् अमोघान् स्थिरजङ्गमानाम् अन्तर्बहिर्वायुरिवैष आत्मा
0117035 सूत उवाच
01170351 परीक्षितैवम् आदिष्टः स कलिर्जातवेपथुः
01170353 तम् उद्यतासिम् आहेदं दण्डपाणिम् इवोद्यतम्
0117036 कलिरुवाच
01170361 यत्र क्व वाथ वत्स्यामि सार्वभौम तवाज्ञया
01170363 लक्षये तत्र तत्रापि त्वाम् आत्तेषुशरासनम्
01170371 तन् मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुम् अर्हसि
01170373 यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम्
0117038 सूत उवाच
01170381 अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ
01170383 द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः
01170391 पुनश्च याचमानाय जातरूपम् अदात् प्रभुः
01170393 ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम्
01170401 अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः
01170403 औत्तरेयेण दत्तानि न्यवसत् तन्निदेशकृत्
01170411 अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्
01170413 विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः
01170421 वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयाम् इति
01170423 प्रतिसन्दध आश्वास्य महीं च समवर्धयत्
01170431 स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम्
01170433 पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता

01170441 आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसन्
01170443 गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः
01170451 इत्थम्भूतानुभावोऽयम् अभिमन्युसुतो नृपः
01170453 यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः

Chapter 18

विप्रशापोपलम्भः

0118001 सूत उवाच
01180011 यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः
01180013 अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः
01180021 ब्रह्मकोपोत्थिताद्यस्तु तक्षकात् प्राणविप्लवात्
01180023 न सम्मुमोहोरुभयाद्भगवत्यर्पिताशयः
01180031 उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः
01180033 वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम्
01180041 नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम्
01180043 स्यात् सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम्
01180051 तावत् कलिर्न प्रभवेत् प्रविष्टोऽपीह सर्वतः
01180053 यावदीशो महान् उर्व्याम् आभिमन्यव एकराट्
01180061 यस्मिन्न् अहनि यर्ह्येव भगवान् उत्ससर्ज गाम्
01180063 तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः
01180071 नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्
01180073 कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत्
01180081 किं नु बालेषु शूरेण कलिना धीरभीरुणा
01180083 अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते
01180091 उपवर्णितम् एतद्वः पुण्यं पारीक्षितं मया
01180093 वासुदेवकथोपेतम् आख्यानं यदपृच्छत
01180101 या याः कथा भगवतः कथनीयोरुकर्मणः
01180103 गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः
0118011 ऋषय ऊचुः
01180111 सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः

01180113 यस्त्वं शंससि कृष्णस्य मर्त्यानाम् अमृतं हि नः
01180121 कर्मण्यस्मिन्न् अनाश्वासे धूमधूम्रात्मनां भवान्
01180123 आपाययति गोविन्द पादपद्मासवं मधु
01180131 तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्
01180133 भगवत्सङ्गिसङ्गस्य मर्त्यानां किम् उताशिषः
01180141 को नाम तृप्येद्रसवित् कथायां महत्तमैकान्तपरायणस्य
01180143 नान्तं गुणानाम् अगुणस्य जग्मुर् योगेश्वरा ये भवपाद्ममुख्याः
01180151 तन् नो भवान् वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य
01180153 हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन्
01180161 स वै महाभागवतः परीक्षिद् येनापवर्गाख्यम् अदभ्रबुद्धिः
01180163 ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्
01180171 तन् नः परं पुण्यम् असंवृतार्थम् आख्यानम् अत्यद्भुतयोगनिष्ठम्
01180173 आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम्
0118018 सूत उवाच
01180181 अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः
01180183 दौष्कुल्यम् आधिं विधुनोति शीघ्रं महत्तमानाम् अभिधानयोगः
01180191 कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य
01180193 योऽनन्तशक्तिर्भगवान् अनन्तो महद्गुणत्वाद्यम् अनन्तम् आहुः
01180201 एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य
01180203 हित्वेतरान् प्रार्थयतो विभूतिर् यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः
01180211 अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः
01180213 सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः
01180221 यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गम् ऊढम्
01180223 व्रजन्ति तत् पारमहंस्यम् अन्त्यं यस्मिन्न् अहिंसोपशमः स्वधर्मः
01180231 अहं हि पृष्टोऽर्यमणो भवद्भिर् आचक्ष आत्मावगमोऽत्र यावान्
01180233 नभः पतन्त्यात्मसमं पतत्त्रिणस् तथा समं विष्णुगतिं विपश्चितः
01180241 एकदा धनुरुद्यम्य विचरन् मृगयां वने
01180243 मृगान् अनुगतः श्रान्तः क्षुधितस्तृषितो भृशम्
01180251 जलाशयम् अचक्षाणः प्रविवेश तम् आश्रमम्
01180253 ददर्श मुनिम् आसीनं शान्तं मीलितलोचनम्
01180261 प्रतिरुद्धेन्द्रियप्राण मनोबुद्धिम् उपारतम्
01180263 स्थानत्रयात् परं प्राप्तं ब्रह्मभूतम् अविक्रियम्
01180271 विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च
01180273 विशुष्यत्तालुरुदकं तथाभूतम् अयाचत
01180281 अलब्धतृणभूम्यादिरसम्प्राप्तार्घ्यसूनृतः

01180283 अवज्ञातम् इवात्मानं मन्यमानश्चुकोप ह
01180291 अभूतपूर्वः सहसा क्षुत्तृड्भ्याम् अर्दितात्मनः
01180293 ब्राह्मणं प्रत्यभूद्ब्रह्मन् मत्सरो मन्युरेव च
01180301 स तु ब्रह्मऋषेरंसे गतासुम् उरगं रुषा
01180303 विनिर्गच्छन् धनुष्कोट्या निधाय पुरम् आगतः
01180311 एष किं निभृताशेष करणो मीलितेक्षणः
01180313 मृषासमाधिराहोस्वित् किं नु स्यात् क्षत्रबन्धुभिः
01180321 तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः
01180323 राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदम् अब्रवीत्
01180331 अहो अधर्मः पालानां पीव्नां बलिभुजाम् इव
01180333 स्वामिन्यघं यद्दासानां द्वारपानां शुनाम् इव
01180341 ब्राह्मणैः क्षत्रबन्धुर्हि गृहपालो निरूपितः
01180343 स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुम् अर्हति
01180351 कृष्णे गते भगवति शास्तर्युत्पथगामिनाम्
01180353 तद्भिन्नसेतून् अद्याहं शास्मि पश्यत मे बलम्
01180361 इत्युक्त्वा रोषताम्राक्षो वयस्यान् ऋषिबालकः
01180363 कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह
01180371 इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि
01180373 दङ्क्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम्
01180381 ततोऽभ्येत्याश्रमं बालो गले सर्पकलेवरम्
01180383 पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह
01180391 स वा आङ्गिरसो ब्रह्मन् श्रुत्वा सुतविलापनम्
01180393 उन्मील्य शनकैर्नेत्रे दृष्ट्वा चांसे मृतोरगम्
01180401 विसृज्य तं च पप्रच्छ वत्स कस्माद्धि रोदिषि
01180403 केन वा तेऽपकृतम् इत्युक्तः स न्यवेदयत्
01180411 निशम्य शप्तम् अतदर्हं नरेन्द्रं स ब्राह्मणो नात्मजम् अभ्यनन्दत्
01180413 अहो बतांहो महदद्य ते कृतम् अल्पीयसि द्रोह उरुर्दमो धृतः
01180421 न वै नृभिर्नरदेवं पराख्यं सम्मातुम् अर्हस्यविपक्वबुद्धे
01180423 यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः
01180431 अलक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयम् अङ्ग लोकः
01180433 तदा हि चौरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणोऽविवरूथवत् क्षणात्
01180441 तदद्य नः पापम् उपैत्यनन्वयं यन् नष्टनाथस्य वसोर्विलुम्पकात्
01180443 परस्परं घ्नन्ति शपन्ति वृञ्जते पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः
01180451 तदार्यधर्मः प्रविलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः
01180453 ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनाम् इव वर्णसङ्करः

01180461 धर्मपालो नरपतिः स तु सम्राड्बृहच्छ्रवाः
01180463 साक्षान् महाभागवतो राजर्षिर्हयमेधयाट्
01180465 क्षुत्तृट्श्रमयुतो दीनो नैवास्मच् छापम् अर्हति
01180471 अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना
01180473 पापं कृतं तद्भगवान् सर्वात्मा क्षन्तुम् अर्हति
01180481 तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि
01180483 नास्य तत् प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि
01180491 इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः
01180493 स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत्
01180501 प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः
01180503 न व्यथन्ति न हृष्यन्ति यत आत्मागुणाश्रयः

Chapter 19

शुकागमनम्

0119001 सूत उवाच
01190011 महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्न् आत्मकृतं सुदुर्मनाः
01190013 अहो मया नीचम् अनार्यवत् कृतं निरागसि ब्रह्मणि गूढतेजसि
01190021 ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात्
01190023 तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवम् अद्धा
01190031 अद्यैव राज्यं बलम् ऋद्धकोशं प्रकोपितब्रह्मकुलानलो मे
01190033 दहत्वभद्रस्य पुनर्न मेऽभूत् पापीयसी धीर्द्विजदेवगोभ्यः
01190041 स चिन्तयन्न् इत्थम् अथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः
01190043 स साधु मेने न चिरेण तक्षका नलं प्रसक्तस्य विरक्तिकारणम्
01190051 अथो विहायेमम् अमुं च लोकं विमर्शितौ हेयतया पुरस्तात्
01190053 कृष्णाङ्घ्रिसेवाम् अधिमन्यमान उपाविशत् प्रायम् अमर्त्यनद्याम्
01190061 या वै लसच्छ्रीतुलसीविमिश्र कृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री
01190063 पुनाति लोकान् उभयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः
01190071 इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम्
01190073 दधौ मुकुन्दाङ्घ्रिम् अनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः
01190081 तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः
01190083 प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः
01190091 अत्रिर्वसिष्ठश्च्यवनः शरद्वान् अरिष्टनेमिर्भृगुरङ्गिराश्च
01190093 पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ
01190101 मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः
01190103 मैत्रेय और्वः कवषः कुम्भयोनिर् द्वैपायनो भगवान् नारदश्च
01190111 अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च

01190113 नानार्षेयप्रवरान् समेतान् अभ्यर्च्य राजा शिरसा ववन्दे
01190121 सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत्
01190123 विज्ञापयाम् आस विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः
0119013 राजोवाच
01190131 अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः
01190133 राज्ञां कुलं ब्राह्मणपादशौचाद् दूराद्विसृष्टं बत गर्ह्यकर्म
01190141 तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम्
01190143 निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयम् आशु धत्ते
01190151 तं मोपयातं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तम् ईशे
01190153 द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः
01190161 पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु
01190163 महत्सु यां याम् उपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः
01190171 इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः
01190173 उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः
01190181 एवं च तस्मिन् नरदेवदेवे प्रायोपविष्टे दिवि देवसङ्घाः
01190183 प्रशस्य भूमौ व्यकिरन् प्रसूनैर् मुदा मुहुर्दुन्दुभयश्च नेदुः
01190191 महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः
01190193 ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम्
01190201 न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु
01190203 येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः
01190211 सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय
01190213 लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः
01190221 आश्रुत्य तदृषिगणवचः परीक्षित् समं मधुच्युद्गुरु चाव्यलीकम्
01190223 आभाषतैनान् अभिनन्द्य युक्तान् शुश्रूषमाणश्चरितानि विष्णोः
01190231 समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे
01190233 नेहाथ नामुत्र च कश्चनार्थ ऋते परानुग्रहम् आत्मशीलम्
01190241 ततश्च वः पृच्छ्यम् इमं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायाम्
01190243 सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः
01190251 तत्राभवद्भगवान् व्यासपुत्रो यदृच्छया गाम् अटमानोऽनपेक्षः
01190253 अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः
01190261 तं द्व्यष्टवर्षं सुकुमारपाद करोरुबाह्वंसकपोलगात्रम्
01190263 चार्वायताक्षोन्नसतुल्यकर्ण सुभ्र्वाननं कम्बुसुजातकण्ठम्
01190271 निगूढजत्रुं पृथुतुङ्गवक्षसम् आवर्तनाभिं वलिवल्गूदरं च
01190273 दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम्
01190281 श्यामं सदापीव्यवयो’ङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन
01190283 प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस् तल्लक्षणज्ञा अपि गूढवर्चसम्

01190291 स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाजहार
01190293 ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः
01190301 स संवृतस्तत्र महान् महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसङ्घैः
01190303 व्यरोचतालं भगवान् यथेन्दुर् ग्रहर्क्षतारानिकरैः परीतः
01190311 प्रशान्तम् आसीनम् अकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य
01190313 प्रणम्य मूर्ध्नावहितः कृताञ्जलिर् नत्वा गिरा सूनृतयान्वपृच्छत्
0119032 परीक्षिदुवाच
01190321 अहो अद्य वयं ब्रह्मन् सत्सेव्याः क्षत्रबन्धवः
01190323 कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः
01190331 येषां संस्मरणात् पुंसां सद्यः शुद्ध्यन्ति वै गृहाः
01190333 किं पुनर्दर्शनस्पर्श पादशौचासनादिभिः
01190341 सान्निध्यात् ते महायोगिन् पातकानि महान्त्यपि
01190343 सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः
01190351 अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः
01190353 पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः
01190361 अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम्
01190363 नितरां म्रियमाणानां संसिद्धस्य वनीयसः
01190371 अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम्
01190373 पुरुषस्येह यत् कार्यं म्रियमाणस्य सर्वथा
01190381 यच् छ्रोतव्यम् अथो जप्यं यत् कर्तव्यं नृभिः प्रभो
01190383 स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम्
01190391 नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम्
01190393 न लक्ष्यते ह्यवस्थानम् अपि गोदोहनं क्वचित्
0119040 सूत उवाच
01190401 एवम् आभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा
01190403 प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः